Devi Mahatmyam

(62 Leaves)

No 41

BOMBAY BRANCH
OF THE
Royal Asiatic Society.
CLASS

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

स॰ पा॰ ॥श्रीगणेशायनमः॥तपस्यंतंमहात्मानंमार्कंडेयंमहामु
निं॥व्यासशिष्योमहातेजाजैमिनिःपर्यपृच्छत॥१॥जैमि
निरुवाच॥महर्षेकथयोत्पत्तिंचंडिकायाःसुविस्तरात्॥यय
व्याप्तंजगत्सर्वंत्रैलोक्यसचराचरं॥२॥मार्कंडेयउवाच॥२॥
सावर्णिःसूर्यतनयोयोमनुःकथ्यतेऽष्टमः॥निशामयत
दुत्पत्तिंविस्तराद्गदतोमम॥३॥महामायानुभावेनयथाम
न्वंतराधिपः॥सबभूवमहाभागःसावर्णिस्तनयोरवेः॥४॥
स्वारोचिषेंतरेपूर्वंचैत्रवंशसमुद्भवः॥सुरथोनामराजाभू

त्समस्तेक्षितिमंडले॥५॥तस्यपालयतःसम्यक्प्रजाःपु
त्रानिवौरसान्॥बभूवुःक्षत्रियोभूपाःकोलाविध्वंसिनस्त
था॥६॥तस्यतैरभवद्युद्धमतिप्रबलदंडिनः॥न्यूनैरपि
शतैर्युद्धेकोलाविध्वंसिभिर्जितः॥७॥ततःस्वपुरमाया
तोनिजदेशाधिपोभवत्॥आक्रांतःसमहाभागतैस्तस्य
प्रबलारिभिः॥८॥अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्यदुरात्म
निः॥कोशोबलंचापहृतंतत्रापिस्वपुरेततः॥९॥ततो
मृगयाव्याजेनहृतस्वाम्यःसभूपतिः॥एकाकीहयमारु

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

ययुर्गामगहनंवनं॥९॥ततस्त्राश्रममपश्यद्द्विजवर्यसुमेधसः॥ प्रणतश्चापदाकीर्णंमुनिशिष्योपशोभितं॥१०॥ तस्थौ कंचित्सकालंचमुनिनातेनसत्कृतः॥ उवासचतत्रविचरंस्तस्मिन्मुनिवराश्रमे॥११॥ सोचिंतयन्नदातत्रममत्वाहृष्टचेतनः॥ मत्पूर्वैःपालितंपूर्वंमयाहीनंपुरंहितत्॥१२॥ मद्भृत्यैस्तैरसद्भृत्यैर्धर्मतःपाल्यतेनवा॥ नजानेसप्रधानोमेशूरोहस्तिसदामदः॥१३॥ ममवैरिवशंयातःकान्भोगानुपलप्स्यते॥ येममानुगतानित्यंप्रसादधनभोजनैः॥१४॥ अनुवृत्तिं ध्रुवंतेद्यकुर्वंत्यन्यमहीभृतां॥ असम्यग्व्ययशीलैस्तैःकुर्वद्भिःसततंव्ययं॥१५॥ संचितःसोतिदुःखेनक्षयंकोशोगमिष्यति॥ एतच्चान्यच्चसततंचिंतयामासपार्थिवः॥१६॥ तत्रविप्राश्रमाभ्यासेवैश्यमेकंददर्शसः॥ सदृष्टस्तेनकस्त्वंभोहेतुश्चागमनेऽत्रकः॥१७॥ सशोकरवकस्मात्त्वंदुर्मनाइवलक्ष्यते॥ इत्याकर्ण्यवचस्तस्यभूपतेःप्रणयोदितं॥ १८॥ प्रत्युवाचसतंवैश्यभूपतेःप्रणयोदितं॥१९॥ वैश्योवाच॥ ॥ ॥ ॥२०॥ समाधिर्नामवैश्योहमुत्पन्नोधनिनांकु

सेे।२१।।पुत्रदारैर्निरस्तश्चधनलोभादसाधुभिः।। विहि
नस्वजनैर्दूरैःपुत्रैरादायमेधनं।।२२।। वनमभ्यागतो
दुखिनिरस्तश्चाप्तबंधुभिः।।सोहंनवेद्मिपुत्राणांकुश
लाकुशलात्मिकां।।२३।।प्रवृत्तिंस्वजनानांचदाराणांचा
त्रसंस्थितः।।किंनुतेषांगृहेक्षेममक्षेमंकिंनुसांप्रतं।।२४
कथंतेकिंनुसद्वृत्तादुर्वृत्ताःकिंनुमेसुताः।।२५।। ।।
राजोवाच।। ।।२६।।यैर्निरस्तोभवान्बुध्दैःपुत्रदारादिभि ३
र्धनैः।।२७।।तेषुकिंभवतःस्नेहमनुबध्नातिमानसं।।

२८।।वैश्यउवाच।। ।।२९।।एवमेतद्यथाप्राहभवानस्मद्ग
तंवचः।।३०।। किंकरोमिनबध्नातिममनिष्ठुरतांमनः
यैःसंत्यज्यपितृस्नेहंधनलुब्धैर्निराकृतः।।३१।।पतिः स्व
जनहार्द्दंचहार्द्दितेष्वेवमेमनः।।किमेतन्नाभिजानामि जा
नन्नपिमहामते।।३२।।यत्प्रेमप्रवणंचित्तंविगुणेष्वपिबं
धुषु।।तेषांकृतेमेनिःश्वासोदौर्मनस्यंचजायते।।३३।।क
रोमिकियन्नमनस्तेष्वप्रीतिषुनिष्ठुरं।।३४।।मार्कंडेयउ
वाच।। ।।३५।। ननस्तोसहितौविप्रतंमुनिसमुपस्थि

तो॥५६॥ समाधिर्नामवैश्योसौसचपार्थिवसत्तमः॥ ह्यु
तुतोयथान्यायंयथार्हंतेनसंविदं॥५७॥ उपविष्टौकथाः
कांश्चित्तक्रतुर्वैश्यपार्थिवौ॥५८॥ राजोवाच॥ ॥५९॥ भ
गवंस्त्वामहंप्रष्टुमिच्छाम्येकंवदस्वतत्॥६०॥ दुःखाय
मेमनसःस्वचित्तायत्ततांविना॥ममत्वंगतराज्यस्वजने
ष्वखिलेष्वपि॥६१॥ जाननोपियथाक्षस्यकिमेतन्मुनिस
त्तम॥ अयंचनिष्कृतःपुत्रैर्दारैर्भृत्यैस्तथोज्झितः॥६२॥ ६
स्वजनेनचसंत्यक्तस्तेषुहार्दीतथाप्यति॥एवमेषतथा

हंचबावप्यत्यंतदुःखितौ॥६३॥ दृष्टदोषेपिविषयेममत
क्षिप्तमानसौ॥तत्केनैतन्महाभागयन्मोहोज्ञानिनोरपि
६४॥ममास्यचभवत्येषाविवेकांधस्यमूढता॥६५॥ऋषि
रुवाच॥ ॥६६॥ज्ञानमस्तिसमस्तस्यजंतोर्विषयगो
चरे॥६७॥ विषयाश्चमहाभागयांतिचैवंपृथक्पृथ
क्॥दिवांधाःप्राणिनःकेचिद्रात्रावंधास्तथापरे॥६८॥
केचिद्दिवातथारात्रौप्राणिनस्तुल्यदृष्टयः॥ज्ञानिनोम
नुजाःसत्यंकिंनुतेनदिकेवलं॥६९॥ यतोहिज्ञानिनः

सर्वेपशुपक्षिमृगादयः॥ज्ञानंचतन्मनुष्याणांयत्तेषां
मृगपक्षिणां॥५७॥ मनुष्याणांचयत्तेषांतुल्यमन्यत्त
थोभयोः॥ज्ञानेपिसतिपश्यैतान्पतंगञ्छकुनांश्चवंचुषु
५१॥ कणमोक्षादृतान्मोहात्पीड्यमानानपिक्षुधा॥मा
नुषामनुजव्याघ्रसाभिलाषाःसुतान्प्रति॥५२॥लोभा
त्प्रत्युपकारायनन्वेतेकिंनपश्यसि॥तथापिममतावं
त्तेमोहगर्त्तेनिपातिताः॥५३॥महामायाप्रभावेनसंसा ५
रस्थितिकारिणः॥तन्नात्रविस्मयःकार्योयोगनिद्रां

गस्यते॥५४॥महामायाहरेश्चैतत्तयासंमोह्यतेजगत्॥
ज्ञानिनामपिचेतांसिदेवीभगवतीहिसा॥५५॥बलादा
कृष्यमोहायमहामायाप्रयच्छति॥तयाविसृज्यतेवि
श्वंजगदेतच्चराचरं॥५६॥सैषाप्रसन्नावरदानृणांभव
तिमुक्तये॥साविद्यापरमामुक्तेर्हेतुभूतासनातनी॥५७
संसारबंधहेतुश्चसैवसर्वेश्वरेश्वरी॥५८॥राजोवाच॥
५९॥भगवन्कोहिसादेवीमहामायेतियांभवान्॥ब्र॥
ब्रवीतिकथमुत्पन्नासाकर्मास्याश्चकिंद्विज॥यत्स्वभावाच

सादेवीयत्स्वरूपायदृग्वा ।६।तत्सर्वंश्रोतुमिच्छामित्व
त्तोब्रह्मविदांवर ।।६।ऋषिरुवाच ।।६।नित्यैवसाजग
न्मूर्त्तिस्तयासर्वमिदंततं ।।६।तथापितत्समुत्पत्तिर्व
हुधाश्रूयतांमम ।देवानांकार्यसिद्ध्यर्थमाविर्भवतिसा
यदा ।६।उत्पन्नेतिततालोकेसानित्याप्यभिधीयते ।यो
गनिद्रांयदाविष्णुर्जगत्येकार्णवीकृते ।६।आस्तीर्यशे
षमभजत्कल्पांतेभगवान्प्रभुः ।तदाद्वावसुरौघोरौवि ६
ख्यातौमधुकैटभौ ।६।विष्णुकर्णमलोद्भूतौहंतुंब्रह्मा

एमुद्यतौ ।।सनाभिकमलेविष्णोःस्थितोब्रह्माप्रजापतिः
६।दृष्ट्वातावसुरौचोग्रौप्रसुप्तंचजनार्दनं ।तुष्टावयो
गनिद्रांतामेकाग्रहृदयस्थितः ।६।विबोधनार्थायह
रेर्हरिनेत्रकृतालयां ।विश्वेश्वरींजगद्धात्रीस्थितिसं
हारकारिणीं ।७। निद्रांभगवतींविष्णोरतुल्यांतेजसः
प्रभुः ।७१।ब्रह्मोवाच ।।।७२।त्वंस्वाहात्वंस्वधात्वंहि
वषट्कारःस्वरात्मिका ।७३ सुधात्वमक्षरेनित्येत्रिधामा
त्रात्मिकास्थिता ।अर्द्धमात्रास्थितानित्यायानुच्चार्याविं

ग्रोषतः॥७५॥त्वमेवसात्वंसावित्रीत्वंदेवीजननीपरा
त्वयैतद्धार्यतेविश्वंत्वयैतत्सृज्यतेजगत्॥७५॥त्वयै
तत्पाल्यतेदेवीत्वमत्स्यंतेचसर्वदा॥विसृष्टौसृष्टिरूपा
त्वंस्थितिरूपाचपालने॥७६॥तथासंहृतिरूपांतेजगतो
स्यजगन्मये॥महाविद्यामहामायामहामेधामहास्मृ
तिः॥७७॥महामोहाभगवतीमहादेवीमहेश्वरी॥प्रकृ
तिस्त्वंचसर्वस्यगुणत्रयविभाविनी॥७८॥कालरात्रि
र्महारात्रिर्मोहरात्रिश्चदारुणा॥त्वंश्रीस्त्वमीश्वरीत्वंह्री

स्त्वंबुद्धिर्बोधलक्षणा॥७९॥लज्जापुष्टिस्तथातुष्टिस्त्वं
शांतिःक्षांतिरेवच॥खड्गिनीशूलिनीघोरागदिनीचक्रि
णीतथा॥८०॥शंखिनीचापिनीबाणभुशुंडीपरिघायु
धा॥सौम्यासौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी॥८१॥
परापराणांपरमात्वमेवपरमेश्वरी॥यच्चकिंचित्क्वचिद्व
स्तुसदसद्वाखिलात्मिके॥८२॥तस्यसर्वस्ययाशक्तिः
सात्वंकिंस्तूयसेतदा॥ययात्वयाजगत्स्रष्टाजगत्पात्यत्ति
योजगत्॥८३॥सोपिनिद्रावशंनीतःकस्त्वांस्तोतुमि

हेश्वरः॥विष्णुःशरीरग्रहणमहमीशानएवच॥८४॥का
रितास्तेयतोनस्त्वंकःस्तोतुंशक्तिमानभवेत्॥सात्वमि
त्थंप्रभावैःस्वैरुदारैर्देवैःसंस्तुता॥८५॥मोहयैतौदुराधर्षौ
वसुरौमधुकैटभौ॥प्रबोधंचजगत्स्वामीनीयतामच्युतो
लघु॥८६॥बोधश्चक्रियतामस्यहंतुमेतौमहासुरौ॥ऋ
षिरुवाच॥८७॥एवंस्तुतातदादेवीतामसीतत्रवेधस
८९॥विष्णोःप्रबोधनार्थायनिहंतुंमधुकैटभौ॥नेत्रास्य ६
नासिकाबाहुहृदेभ्यस्तथोरसः॥९०॥निर्गम्यदर्शनें

तस्तोब्रह्मणोव्यक्तजन्मनः॥उत्तस्तोचजगन्नाथस्तथामु
क्तोजनार्दनः॥९१॥एकार्णवेहिशयनात्ततःसदृष्टवांश्च
तौ॥मधुकैटभदुरात्मानावतिवीर्यपराक्रमौ॥९२॥को
धरक्तेक्षणावत्तुंब्रह्माणंजनितोद्यमौ॥समुद्यततस्त
स्यांयुयुधेभगवान्हरिः॥९३॥पंचवर्षसहस्राणिबाहु
प्रहरणोविभुः॥तावप्यतिबलोन्मत्तौमहामायाविमोहि
तौ॥९४॥ऊचतुंतौवरोस्मत्तोव्रियतामितिकेशवं॥९५॥
श्रीभगवानुवाच॥९६॥भवेतामद्यमेतुष्टौममवध्या

वुभावपि ।।९७।। किमन्येनवरेणात्रएतावद्धिवरंमम ।।
९८।। ऋषिरुवाच ।।९९।। वंचिताभ्यामितितत्सर्वमाप
मयंजगत् ।।१००।। विलोक्यताभ्यांगदितोभगवान्कमले
क्षणः ।। आवांजहिनयत्रोर्वीसलिलेनपरिप्लुता ।।१०१
ऋषिरुवाच ।। ।।१०२।। तथेत्युक्त्वाभगवतानारायणचक्र
गदाभृता ।। हत्वाचकेणवैच्छिन्नेजघनेशिरसीतयोः ।।
१०३।। एवमेषासमुत्पन्नाब्रह्मणासंस्तुतास्वयं ।। प्रभा
वमस्यादेव्यास्तुभूयःशृणुवदामिते ।।१०४।। इतिमार्क

ण्डेयपुराणेसावर्णिकेमन्वंतरेदेवीमहात्म्येमधुकैटभवधः
।।२।। ।।प्रथमोध्यायः ।।१।। ।।ऋषिरुवाच ।।१।।
देवासुरमभूद्युद्धंपूर्णमब्दानांपुरा ।। महिषेसुराणाम
धिपेदेवानांचपुरंदरे ।।२।। तत्रासुरैर्महावीर्यैर्देवसैन्यं
पराजितं ।। जित्वाचसकलान्देवानिंद्रोभून्महिषासुरः ।।
३।। ततःपराजिताःदेवाःपद्मयोनिंप्रजापतिं ।। पुरस्कृ
त्यगतास्तत्रयत्रेशगरुडध्वजौ ।।४।। यथावृत्तंतयोस्त
द्वन्महिषासुरचेष्टितं ।। त्रिदशाःकथयामासुर्देवाग्नि

वविस्मरं॥५॥सूर्येंद्राग्न्यनिलेंदूनांयमस्यवरुणस्यच॥
अन्येषांचाधिकारान्मस्वयमेवाधितिष्ठति॥६॥स्वर्गान्नि
राकृताःसर्वेतेनदेवगणाभुवि॥विचरंतियथामर्त्यामहि
षेणदुरात्मना॥७॥एतद्वःकथितंसर्वममरारिविचेष्टितं
सुरर्षभःप्रपन्नास्तोवधस्तस्यविचिंत्यतां॥८॥इत्युक्तेनि
म्रुचोवाचसिमधुसूदनः॥चकारकोपंसुभृशंभ्रुकुटिं
कुटिलाननौ॥९॥ततोतिकोपपूर्णस्यचक्रिणोवदनान्न
तः॥निश्चक्रामम्हत्तेजोब्रह्मणःशंकरस्यच॥१०॥अ

न्येषांचैवदेवानांशक्रादीनांशरीरतः॥निर्गतंसुमहत्तेज
स्तच्चैक्यंसमगच्छत॥११॥अतीवतेजसःकूटंज्वलंतमिव
पर्वतं॥ददृशुस्तेसुरास्तत्रज्वालाव्याप्तदिगंतरं॥१२॥अ
तुलंतत्रतत्तेजःसर्वदेवशरीरजं॥एकस्थंतदभून्नारीव्या
प्तलोकत्रयंत्विषा॥१३॥यदभूच्छांभवंतेजस्तेनाजायत
तन्मुखं॥याम्येनचाभवन्केशाबाहवोविष्णुतेजसा॥१४॥
सौम्येनस्तनयोर्युग्ममध्यंचैंद्रेणचाभवत्॥वारुणेनच
जंघोरुनितंबस्तेजसाभुवः॥१५॥ब्रह्मणस्तेजसापादौ

नदंगुल्योर्कतेजसा॥ वसूनांचकरांगुल्यःकौवेरेणचनासि
का॥१६॥ नस्यास्तुदंताःसंभूताःप्राजापत्येनतेजसा॥न
यनत्रितयंयत्नेतथापावकतेजसा॥१७॥भ्रुवौचसंध्ययोस्ते
जःश्रवणावनिलस्यच॥अन्येषांचैवदेवानांसंभवत्तेजस
गिवा॥१८॥ततःसमस्तदेवानांतेजोराशिसमुद्भवं॥तं
विलोक्यमुदंप्रापुरमरामहिषार्दिताः॥१९॥शूलंशूल्या
दिनिक्षिप्यददौतस्यैपिनाकधृक्॥चक्रंचदत्तवान्कृष्णः
समुत्पाट्यस्वचक्रतः॥२०॥शंखंचवरुणःप्रादाद्ददौन

स्यैकुनाग्नानः॥मारुतोदत्तवांश्चापंबाणपूर्णेतथेषुधी
२१॥वज्रमिंद्रःसमुत्पाद्यकुलिशादमराधिप॥ददौत
स्यैसहस्राक्षोघंटामैरावताद्गजात्॥२२॥कालदंडाद्यमो
दंडंपाशंचांबुपतिर्ददौ॥प्रजापतिश्चाक्षमालांददौब्रह्म
कमंडलुं॥२३॥समस्तरोमकूपेषुनिजरश्मीन्दिवाकर
कालश्चदत्तवान्खड्गंतस्याश्चर्मचनिर्मलं॥२४॥क्षीरोद
श्चामलंहारमजरेचतथांबरे॥चूडामणिंतथादिव्यंकुं
डलेकटकानिच॥अर्द्धचंद्रंतथाभ्रुभ्रंकेयूरान्सर्वबाहुषु

रत्नपुरोविमलोनदत्रैवेयकमनुत्तमं॥२५॥ ॐअंगुलीयक
रत्नानिसमस्तास्वंगुलीषुच॥ विश्वकर्मादृदौतस्मैपर
मुंचानिनिर्मलं॥२७॥ ॐअन्याएपनेकरूपाणितथाभेद्यं
चदंशनं॥ ॐअम्लानपंकजंमालंशिरस्युरसिचापरं॥२८
ॐअदृश्यत्वधिस्तस्मैपंकजंचानिशोभनं॥हिमवान्वाह्
नंसिंहरत्नानिविविधानिच॥२९॥ ददावम्लेच्छसुरया
पानपात्रंधनाधिपः॥शेषश्चसर्वनागेशोमहामणिवि २२
भूषितं॥३०॥नागहारंददौतस्मैधनेशःपृथिवीमिमां

ॐअन्यैरपिसुरैर्देवीभूषणैरायुधैस्तथा॥३१॥संम्मानि
तानिनादोच्चैःसाट्टहासंमुहुर्मुहुः॥तस्यानादेनघोरे
णपूरितंनभः॥३२॥ॐमायतानिमहतामतिग्राह्योमहानभूत्॥चुक्षुभुःसकलालोकाःसमुद्राश्चच
कंपिरे॥३३॥चचालवसुधाचेलुःसकलाश्चमहीधराः
नयेनिचमुदादेवास्तामूचुःसिंहवाहिनी॥३४॥तुष्टुवु
र्मुनयश्चैनांभक्तिनम्रात्ममूर्तयः॥दृष्ट्वासमस्तंसंक्षुब्धं
त्रैलोक्यममरारयः॥३५॥सन्नद्धाखिलसैन्यास्तेसमुद्य

स्तुरुदायुधाः॥ ॐ किमेतदिति क्रोधरक्ताभ्यमहिषासुरः॥ ३९॥ ॐ अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः॥ ददर्शततो देवीं व्याप्तलोकत्रयां त्विषा॥ ४०॥ पादाक्रान्त्या नतभुवं किरीटोल्लिखितांबरां॥ क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन च॥ ४१॥ दिशो भुजसहस्रेण समंताद्व्याप्यसंस्थितां॥ ततः प्रववृते युद्धं तया देव्यासुरद्विषां॥ ४२॥ शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगंतरं॥ महिषासुर सेनानीश्चिक्षुराख्यो महासुरः॥ ४३॥ युयुधे चामरश्चा

न्यैश्चतुरंगबलान्वितः॥ रथानामयुतैः षड्भिरुदग्राख्यो महासुरः॥ ४४॥ ॐ युध्यतायुतानां च सहस्रेण महाहनुः॥ पंचाषद्भिश्च नियुतैरसिलोमा महासुरः॥ ४५॥ ॐ अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे॥ गजवाजिसहस्रौघैरनेकैः परिवारितः॥ ४६॥ बृतो रथानां कोट्या च युद्धेनास्मिन्नयुध्यत॥ बिडालाख्यो युतानां च पंचाषद्भिरथायुतैः॥ ४७॥ युयुधे संयुगे तत्र रथानां परिवारितः॥ ॐ अन्ये च तत्रायुतशो रथनागहयैर्वृताः॥ ४८॥ युयुधुः

संयुगेदेव्यासहतत्रमहासुराः॥ कोटिकोटिसहस्रैस्तुरथा
नांदंतिनांतथा॥५६॥ हयानांचवृतोयुद्धेतत्राभून्महिषा-
सुरः॥ तोमरैर्भिंदिपालैश्चशक्तिभिर्मुशलैस्तथा॥५७॥युयु
धुःसंयुगेदेव्याखड्गैःपरशुपट्टिशैः॥ केचिच्चिक्षिपुःश
क्तीःकेचित्पाशांस्तथापरे॥५८॥देवीखड्गप्रहारैस्तुतेतां
हंतुंप्रचक्रमुः॥ सापिदेवीततस्तानिशस्त्रास्त्राण्यस्त्राणि
चंडिका॥५९॥लीलयैवप्रचिच्छेदनिजशस्त्रास्त्रवर्षिणी २५
प्रनाथस्तानतादेवीस्तूयमानासुरर्षिभिः॥५९॥सुमो

चासुरदेहेभ्यश्शस्त्राण्यस्त्राणिचेश्वरी॥ सोपिकुद्धोदुतस
दोदेव्यावाहनकेसरी॥५२॥चचारासुरसैन्येषुवनेष्विव
हुताशनः॥ निःश्वासान्मुमुचेयांश्चयुध्यमानारणेबिका
५२॥तएवसद्यःसंभूतागणाःशतशोनृपाः॥ युयुधुस्ते
परश्वभिर्भिंदिपालासिपट्टिशैः॥५३॥नाशयंतोसुरगणा
न्देवीशक्त्युपबृंहिताः॥ प्रवादयंतःपरहानृगणाःशंखां
स्तथापरे॥५४॥मृदंगांश्चतथैवान्येतस्मिन्युद्धमहोत्सवे
ननोदेवीत्रिशूलेनगदयाशक्तिवृष्टिभिः॥५५॥खड्गादि

मिश्वन्यानशोनिजघानमहासुरान्॥ पातयामासचैवान्या
न्घंटास्वनविमोहितान्॥५६॥ असुरान्भुविपाशेनब
ध्वाचान्यानकर्षयन्॥ केचित्द्विधाकृतास्तीक्ष्णैःखड्ग
तैस्तथापरे॥५७॥ विपोथितानिपातेनगदयाभुविशेरते
वेमुश्चकेचिद्रुधिरंमुसलेनभृशंहताः॥५८॥ केचिन्नि
पतिताभूमौनिर्भिन्नाःशूलेनवक्षसि॥ निरंतराःशरौघेण
हताःकेचिद्रणाजिरे॥५९॥ सेनानुकारिणःप्राणान्मु
मुचुस्त्रिदशार्दनाः॥ केषांचिद्बाहवश्छिन्नाश्छिन्नग्रीवा

स्तथापरे॥६०॥ शिरांसिपेतुरन्येषामन्येमध्येविदारिताः
विच्छिन्नजंघास्त्वपरेपेतुरुर्व्यांमहासुराः॥६१॥एकबाह्व
क्षिचरणाःकेचिद्द्व्यादिधाकृताः॥ छिन्नेपिचान्येशिरसि
पतिताःपुनरुत्थिताः॥६२॥ कबंधायुयुधुर्दृष्ट्वागृहीतप
रमायुधाः॥ नन्नृतुश्चापरेनत्रयुद्धेनूर्यलयान्विताः॥६३॥
कबंधाश्छिन्नशिरसःखड्गशक्तिपाणयः॥ निघ्नंतोदेवीमन्येमहासुराः॥६४॥पातितैरथनागाश्वै
सुरैश्चवसुंधरा॥ अगम्यासाभवत्तत्रयत्राभूत्समरोद्

णाः॥ ६५॥ शोणितौघामहानद्यस्तत्रविस्रुस्तुवुः॥ म
ध्येचासुरसैन्यस्यवारणासुरवाजिनां॥ ६६॥ क्षणेननन्म
हासैन्यमसुराणांतथांबिका॥ निन्येक्षयंयथावह्निस्तृण
दारुमहाचयं॥ ६७॥ सचसिंहोमहानादमुत्सृजन्धुतके
सरः॥ शरीरेभ्योमराणिनामस्त्रनिवविचिन्वति॥ ६८॥ दे
व्यागणेश्वनैस्तत्रयुद्धंतथासुरैः॥ ययैषांतुष्टुवु
र्देवाःपुष्पवृष्टिमुचोदिवि॥ ६९॥ इतिश्रीमार्कंडेयपुराणे ६६
सावर्णिकेमन्वंतरेदेवीमाहात्म्येमहीषासुरसैन्यवधः॥ ५॥ द्वि॰

ऋषिरुवाच॥ ॥ १॥ निहन्यमानंतत्सैन्यमवलोक्यमहासु
रः॥ सेनानीश्चिक्षुरःकोपाद्ययौयोद्धुमथांबिकां॥ २॥ सदे
वीशरवर्षेणववर्षसमरेसुरः॥ यथामेरुगिरेश्शृंगंतोयव
र्षेणतोयदः॥ ३॥ तस्यच्छित्वाततोदेवीलीलयैवशरोत्क
रान्॥ जघाननतुरगान्बाणैर्यंतारंचैववाजिनां॥ ४॥ चिछे
दचधनुःसद्योध्वजंचातिसमुच्छ्रितं॥ विव्याधचैवगात्रेषु
च्छिन्नधन्वानमाशुगैः॥ ५॥ सच्छिन्नधन्वाविरथोहताश्वो
हतसारथिः॥ अभ्यधावत्तदादेवीखड्गचर्मधरोसुरः॥ ६॥

LITERARY SOCIETY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

सिंहमाहत्यखड्गेननीक्ष्णधारेणमूर्द्धनि।।आजघानभु
जेसव्येदेवीमप्यतिवेगवान्।।७।।तस्याःखड्गोभुजंप्राप्य
पफालनृपनंदन।।ततोजग्राहशूलंसकोपादरुणलोच
नः।।८।।चिक्षेपचततस्तन्तुभद्रकाल्यांमहासुरः।।ज्व
ल्यमानंतेजोभिरविबिंबमिवांबरात्।।९।।दृष्ट्वातदापत
च्छूलंदेवीशूलममुंचत।।तच्छूलंशतधातेननीतंसचमहा
सुरः।।१०।।हतेतस्मिन्महावीर्येमहिषस्यचमूपतौ।।आ २
जगामगजारूढश्चामरस्त्रिदशार्दनः।।११।।सोपिशक्तिं

मुमोचाथदेव्यास्तामंबिकाहुतं।।हुंकाराभिहतांभूमौपा
तयामासनिष्प्रभां।।१२।।भग्नांशक्तिंनिपतितांदृष्ट्वाकोध
समन्वितः।।चिक्षेपचामरःशूलंबाणैस्तदपिसाच्छिनत्।।
१३।।ततःसिंहसमुत्पत्यगजकुंभांतरेस्थितः।।बाहुयुद्धेन
युयुधेतेनोच्चैस्त्रिदशारिणा।।१४।।युध्यमानौततस्तौतु
स्माद्गगन्मंहीगतौ।।युयुधातेतिसंरब्धौप्रहारैरतिदारु
णैः।।१५।।ततोवेगात्खमुत्पत्यनिपत्यचमृगारिणा।।क
रप्रहारेणशिरश्चामरस्यपृथक्कृतं।।१६।।उदग्यश्चरणो

देव्याशिलावृक्षादिभिर्हतः॥ दंतमुष्टितलैश्चैवकरालश्च
निपातितः॥२७॥देवीकुद्धागदापातैश्चूर्णयामासचोद्धतं
बाष्कलंभिंदिपालेनबाणेनोग्रंतथांधकं॥२८॥उग्रास्य
मुग्रवीर्यंचतथैवचमहाहनुं॥त्रिनेत्राचत्रिशूलेनजघानप
रमेश्वरी॥२९॥बिडालस्यासिनाकायात्पातयामासवैशि
रः॥दुर्धरंदुर्मुखंचोग्रैरैर्निःशेषमक्षयं॥३०॥एवंसंक्षी
यमाणेतुस्वसैन्येमहिषासुरः॥माहिषेणस्वरूपेणत्रास १९
यामासतान्गणान्॥३१॥कांश्चित्तुंडप्रहारेणखुरक्षे

पैस्तथापरान्॥लांगूलताडितांश्चान्यान्शृंगाभ्यांचविदा
रितान्॥३२॥वेगेनकांश्चिदपरान्नादेनभ्रमणेनच॥नि:
श्वासपवनेनान्यान्पातयामासभूतले॥३३॥निपात्यप्र
मथानीकमभ्यधावतसोऽसुरः॥सिंहंहंतुंमहादेव्याः को
पंचक्रेततोंबिका॥३४॥सोपिकोपान्महावीर्यःखुरक्षुण्ण
महीतलः॥शृंगाभ्यांपर्वतानुच्चांश्चिक्षेपचननादच॥३५
वेगभ्रमणविक्षुण्णमहीतस्यव्यशीर्यत॥लांगूलेना
हतश्चाब्धिःप्लावयामाससर्वतः॥३६॥पुनश्शृंगविन्नि

न्नाश्वघंटंखंटंययुर्घनाः॥श्वासानिलास्ताःशतशोनिपे
तुर्नभसोचलाः॥९७॥इतिक्रोधसमाध्मातमापतंतंम
हासुरं॥दृष्ट्वासाचंडिकेकोपंतद्वधायतदाकरोत्॥९८॥
सासिखातस्यवैपाशंतंबबंधमहासुरं॥तत्याजमाहि
षंरूपंसोपिबद्धोमहामृधे॥९९॥ततःसिंहोभवत्सद्योया
वत्स्पोविकासिरः॥छिन्नत्तिनावत्पुरुषःखड्गपाणिर
दृश्यत॥१००॥तनएवाशुपुरुषंदेवीचिच्छेदसायकैः॥तंख ९९
ड्गचर्मणासार्द्धंततःसोभून्महागजः॥१०१॥करेणचमहा

सिंहंतंचकर्षजगर्जच॥कर्षतस्तुकरंदेवीखड्गेननिरकृंत
त॥१०२॥ततोमहासुरोभूयोमाहिषंवपुरास्थितः॥तथैव
क्षोभयामासत्रैलोक्यंससचराचरं॥१०३॥ततःकुद्धाजग
न्मातांचंडिकापानमुत्तमं॥पपौपुनःपुनश्चैवजहासा
रुणलोचना॥१०४॥ननर्दचासुरःसोपिबलवीर्यमदोद्धत
विषाणाभ्यांचचिक्षेपचंडिकांप्रतिभूधरान्॥१०५॥साचतां
न्प्रहितांस्तेनचूर्णयंतीशरोत्करैः॥उवाचतंमदोद्धूतमुख
रागकृतेक्षणं॥१०६॥देव्युवाच॥॥१०७॥गर्जगर्जक्ष

णेमूढमधुयावन्निबाम्यहं॥ मयात्वयिहतेवैवगर्जिष्यंत्य
ल्पदेवताः॥३९॥ऋषिरुवाच॥४०॥एवमुक्तासमुत्पत्य
सारूढानंमहासुरं॥पादेनाक्रम्यकंठेचशूलेनैवमताड
यत्॥४०॥ततःसोपिपदाक्रांतस्तयानिर्भुरुयाततः॥
अर्द्धनिष्क्रांतएवातिदेव्यावीर्येणसंवृतः॥४२॥अर्द्ध
निष्क्रांतएवासौयुध्यमानोमहासुरः॥तयामहासिनाद
व्याशिरश्छित्वानिपातितः॥४२॥ततोहाहाकृतंसर्वंदै २०
त्यसैन्यंननाशयत्॥महर्षेचपरंजग्मुःसकलादेवता

गणाः॥४३॥तुष्टुवुस्तांसुरादेवीसहदिव्यैर्महर्षिभिः
जगुर्गंधर्वपतयोननृतुश्चाप्सरोगणाः॥४४॥चतुच
त्वारिंशादेवंसर्वेमंवास्तनीयके॥इतिश्रीमार्कंडेयपुराणे
सावर्णिकमन्वंतरेदेवीमहात्म्येमहिषासुरवधः॥तृतीयो
ऽध्यायः॥३॥ ॥ऋषिरुवाच॥॥१॥॥ शक्रादयः
सुरगणानिहतेतिवीर्येतस्मिन्दुरात्मनिसुरारिबलेच
देव्या॥तांतुष्टुवुःप्रणतिनम्रशिरोधरांसावाग्भिःप्रह
र्षपुलकोद्गमचारुदेहाः॥२॥देव्यायतातमिदंजगद्

त्मन्नान्निःशेषदेवगणशक्तिसमूहमूर्त्या॥तामंबिकामखिलदेवमहर्षिपूज्यांभक्तानताःस्मविदधातुशुभानिसानः॥५॥यस्याःप्रभावमतुलंभगवाननंतोब्रह्माहरश्चनहिवक्तुमलंबलंच॥साचंडिकाखिलजगत्परिपालनायनाशायचाशुभभयस्यमतिंकरोतु॥६॥याःश्रीःस्वयंसुकृतिनांभवनेष्वलक्ष्मीःपापात्मनांकृतधियांहृदयेषुबुद्धिः॥श्रद्धासतांकुलजनप्रभवस्यलज्जांतांत्वांनताःस्मपरिपालयदेविविश्वं॥७॥किंवर्ण्यामतवरूपमचिंत्यमेतत्किंचातिवीर्यमसुरक्षयकारिभूरि॥किंचाहवेषुचरितानितवाद्भुतानिसर्वेषुदेव्यसुरदेवगणादिकेषु॥८॥हेतुःसमस्तजगतांत्रिगुणापिदोषैर्नज्ञायसेहरिहरादिभिरप्यपारा॥सर्वाश्रयाखिलमिदंजगदंशभूतमव्याकृताहिपरमाप्रकृतिस्त्वमाद्या॥९॥यस्याःसमस्तसुरतासमुदीरणेनतृप्तिंप्रयातिसकलेषुमखेषुदेवि॥स्वाहासिवैपितृगणस्यचतृप्तिहेतुरुच्चार्यसेत्वमतएवजनैःस्वधाच॥१०॥यामुक्तिहेतुरविचिंत्यमहाव्रताचत्व

स्मेतत्किंचातिवीर्यमसुरक्षयकारिभूरि॥किंचाहवेषुचरितानितवाद्भुतानिसर्वेषुदेव्यसुरदेवगणादिकेषु॥८॥हेतुःसमस्तजगतांत्रिगुणापिदोषैर्नज्ञायसेहरिहरादिभिरप्यपारा॥सर्वाश्रयाखिलमिदंजगदंशभूतमव्याकृताहिपरमाप्रकृतिस्त्वमाद्या॥९॥यस्याःसमस्तसुरतासमुदीरणेनतृप्तिंप्रयातिसकलेषुमखेषुदेवि॥स्वाहासिवैपितृगणस्यचतृप्तिहेतुरुच्चार्यसेत्वमतएवजनैःस्वधाच॥१०॥यामुक्तिहेतुरविचिंत्यमहाव्रताचत्व

भ्यस्यसेसुनियतेंद्रियतत्त्वसारैः॥मोक्षार्थिभिर्मुनिभिर
स्तसमस्तदोषैर्विद्यासिसाभगवतीपरमाहिदेवि॥९॥
आद्यात्मिकासुविमलर्ग्यजुषांनिधानमुद्गीथरम्यपदपा
ठवतांचसाम्नां॥देवीत्रयीभगवतीभवभावनायवार्ता
चसर्वजगतांपरमार्तिहंत्री॥१०॥मेधासिदेविविदिता
खिलशास्त्रसारादुर्गासिदुर्गभवसागरनौरसंग्ा॥श्री॥
कैटभारिहृदयैककृताधिवासागौरीत्वमेवशशिमौलि २२
कृतप्रतिष्ठा॥११॥ईषत्सहासममलंपरिपूर्णचंद्र बिं

बानुकारिकनकोत्तमकांतिकांतं॥अत्यद्भुतंप्रहसनमा
त्मरुषानथापिवक्त्रंविलोक्यसहसामहिषासुरेण॥१२॥
दृष्ट्वातुदेविकुपितंभ्रकुटिकरालमुद्यच्छशांकसदृशछ
वियन्नसद्यः॥प्राणान्मुमोचमहिषस्तदतीवचित्रंकैर्जी
व्यतेहिकुपितांतकदर्शनेन॥१३॥देविप्रसीदपरमा
भवतीभवायसद्योविनाशयसिकोपवतीकुलानि॥वि
ज्ञातमेतदधुनैवयदस्तमेतन्नीतंबलंसुविपुलंमहिषा
सुरस्य॥१४॥तेसंमतानिजनपदेषुधनानितेषांतेषांय

मांसिनवसीदतिबंधुवर्गः॥धन्यास्त्वएवनिभृतात्मज
स्यदारायेषांसदाभ्युपयदाभवतीप्रसन्ना॥१७॥धर्म्म
णिदेविसकलानिसदैवकर्म्माण्यन्याहृतःप्रतिदिनंसुरु
तिंकरोति॥स्वर्गंप्रयातिचततोभवतीप्रसादाल्लोकत्रये
पिफलदाननुदेविनेन॥१८॥दुर्गेस्मृताहरसिभीतिमशे
षजंतोःस्वस्थैःस्मृतामतिमतीवशुभांददासि॥दारिद्र
दुःखभयहारिणिकात्वदन्यासर्वोपकारकरणायसदा २३
र्द्रचित्ता॥एभिर्हतैर्जगदुपैतिसुखंतथैनेकुर्वंतुनामन

रकायचिरायपापं॥संग्राममृत्युमधिगम्यदिवंप्रयांति
मत्वेतिनूनमहितान्विनिहंसिदेवि॥१९॥दृष्ट्वैवकिंन
भवतीप्रकरोतिभस्मसर्वासुरानरिषुयत्प्रहिणोषिशस्त्रं
॥लोकान्प्रयांतुरिपवोपिहिशस्त्रपूतादुर्गेमतिर्भव
तिनेषुहिनेषुसाध्वी॥२०॥खड्गप्रभानिकरविस्फुरणै
स्तथोग्रैःशूलाग्रकांतिनिवहेनदृशोसुराणां॥यन्नागता
विलयमंशुमदिंदुखंडंयोन्याननंतवविलोकयतांतदेत
त्॥२१॥दुर्वृत्तवृत्तशमनंतवदेविशीलंरूपंतथैतदवि

चिंत्यमतुल्यमन्यैः॥ वीर्यंचहंतरुद्देवपराक्रमाणांवैरि
ष्वपिप्रकटितैवदयात्वयेदं॥२१॥ केनोपमाभवतुतेस्यप
राक्रमस्यरूपंचशत्रुभयकार्यतिहारिकुत्र॥ चित्तेकृपा
समरनिष्ठुरतात्वदृष्टात्वय्येवदेविवरदेभुवनत्रयेपि॥
२२॥त्रैलोक्यमेतदखिलंरिपुनाशनेनत्रातंत्वयासमरमू
र्द्धनिहतेपिहत्वा॥ नीतारिवंरिपुगणाभयमप्यपास्तमस्मा
कमुन्मदसुरारिभवंनमस्ते॥२३॥शूलेनपाहिनोदेवी २५
पाहिखड्गेनचांबिके॥ घंटास्वनेननःपाहिचापज्यानिःस्व

नेनच॥२४॥प्राच्यांरक्षप्रतीच्यांचचंडिकेरक्षदक्षिणे॥
भ्रामणेनात्मशूलस्यउत्तरस्यांतथेश्वरी॥२५॥सौम्या
नियानिरूपाणित्रैलोक्येविचरंतिते॥यानिचात्यंतघो
राणितैरस्मांस्तथाभुवं॥२६॥खड्गशूलगदादीनि
यानिचास्त्राणितेंबिके॥करपल्लवसंगीनितैरस्मान्र
क्षसर्वतः॥२७॥ऋषिरुवाच॥ १२८॥एवंस्तुतासुरैर्दि
व्यैःकुसुमैर्नंदनोद्भवैः॥अर्चितातज्जगतांधात्रीतथागं
धानुलेपनैः॥२९॥भक्त्यासमस्तैस्त्रिदशैर्दिव्यैरुपेत्यधू

पिता॥ प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान्
॥ श्रीदेव्युवाच ॥ ॥ ब्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभि
वांछितं॥ ॥ देवा ऊचुः॥ ॥ भगवत्या कृतं सर्वं न किं
चिदवशिष्यते॥ यदयं निहतः शत्रुरस्माकं महिषा
सुरः॥ यदि चापि वरो देयस्त्वया अस्माकं महेश्वरी॥
संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः॥ यश्चम
र्त्यस्तवैरेभिस्तोत्रैस्त्वां स्तोष्यत्यमलानने॥ तस्य वित्त २५
र्द्धिविभववैर्धनदारादिसंपदं॥ देह्यस्मत्प्रसन्नानंभवे

थाः सर्वदांबिके॥ ॥ ऋषिरुवाच॥ ॥ इतिप्रसादिता
देवैर्जगतोर्थेनथात्मनः॥ तथेत्युक्त्वाभद्रकालीबभूवां
तर्हितानृप॥ ॥ इत्येतत्कथितंभूपसंभूतासायथापु
रा॥ देवीदेवशरीरेभ्योगजगत्रयहितैषिणी॥ ॥ पुन
श्चगौरीदेहात्समुद्भूतायथाभवत्॥ वधायदुष्टदैत्या
नांतथाशुंभनिशुंभयोः॥ ॥ रक्षणायचलोकानांदे
वानामुपकारिणी॥ तच्छृणुष्वमयाख्यानंयथावत्कथ
यामिते॥ ॥ षट्त्रिंशाक्षरोंकेक्ष्यायेचतारिंशतद्व

धिकं॥५३॥इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतर
देवीमाहात्म्येरक्तबीजवधोनामचतुर्थोध्यायः॥४॥ऋषिरुवाच॥१॥
पुरासुंभनिशुंभाभ्यामसुराभ्यांशचीपतेः॥त्रैलोक्यं
यज्ञभागाश्चहृतामदबलाश्रयात्॥२॥तावेवसूर्यतांतद्व
दधिकारंतथैंदवं॥कौबेरमथयाम्यंचचक्रातेवरुणा॰
स्यच॥३॥तावेवपवनर्द्धिंचचक्रतुर्वह्निकर्मच॥ततोदेवा
विनिर्धूताभ्रष्टराज्याःपराजिताः॥४॥हृताधिकारास्त्रि २६
दशास्ताभ्यांसर्वेनिराकृताः॥महासुराभ्यांतांदेवीसंस्म

रंत्यपराजितां॥५॥तयास्माकंवरोदत्तोयथापत्स्मृता
खिलाः॥भवतांनाशयिष्यामितत्क्षणात्परमापदः॥६॥
इतिहृत्वामतिंदेवाहिमवंतंनगेश्वरं॥जग्मुस्तत्रततो
देवींविष्णुमायांप्रतुष्टुवुः॥७॥देवाऊचुः॥॥८॥नमोदेव्यै
महादेव्यैशिवायैसततंनमः॥नमःप्रकृत्यैभद्रायैनिय
ताःप्रणताःस्मतां॥९॥रौद्रायैनमोनित्यायैगौर्यैधा॰
त्र्यैनमोनमः॥ज्योत्स्नायैचेंदुरूपिण्यैसुखायैसततंनम
मः॥१०॥कल्याण्यैप्रणतांवृद्ध्यैसिद्ध्यैकुर्मोनमोनमः॥

नैर्ऋत्यैशूलहस्तायैशूलार्पणायैतेनमोनमः॥१२॥दुर्गायैदुर्गपरायैसारायैसर्वकारिणि॥ख्यात्यैतथैवकृष्णायैधूम्रायैसततंनरः॥१३॥अतिसौम्यातिरौद्रायैनमस्तस्यैनमोनमः॥नमोजगत्प्रतिष्ठायैदेव्यैकृत्यैनमोनमः॥१४॥यादेवीसर्वभूतेषुमहामायेतिशब्दिता॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥१६॥यादेवीसर्वभूतेषुचेतनेत्यभिधीयते॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥१९॥यादेवीसर्वभूतेषुबुद्धिरूपेणसंस्थिता॥नमस्तस्यैनमस्तस्यैन २७

मस्तस्यैनमोनमः॥२२॥यादेवीसर्वभूतेषुनिद्रारूपेणसंस्थिता॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥२५॥यादेवीसर्वभूतेषुक्षुधारूपेणसंस्थिता॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥२८॥यादेवीसर्वभूतेषुछायारूपेणसंस्थिता॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥३१॥यादेवीसर्वभूतेषुशक्तिरूपेणसंस्थिता॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥३४॥यादेवीसर्वभूतेषुतृष्णारूपेणसंस्थिता॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमो

नमः॥३७॥यादेवीसर्वभूतेषुक्षांतिरूपेणसंस्थिता॥नमस्तस्यै
३८नमस्तस्यै३९नमस्तस्यैनमोनमः॥४०॥यादेवीसर्वभूतेषु
क्षांतिरूपेणसंस्थिता॥नमस्तस्यै४१नमस्तस्यै४२नमस्तस्यै
नमोनमः॥४३॥यादेवीसर्वभूतेषुलक्षारूपेणसंस्थिता॥न
मस्तस्यै४४नमस्तस्यै४५ नमस्तस्यैनमोनमः॥४६॥ यादेवी
सर्वभूतेषुशांतिरूपेणसंस्थिता॥नमस्तस्यै४७ नमस्तस्यै
४८ नमस्तस्यैनमोनमः॥४९॥यादेवीसर्वभूतेषुश्रद्धारूपेण
संस्थिता॥नमस्तस्यै५० नमस्तस्यै५१ नमस्तस्यैनमोनमः५२

२६

यादेवीसर्वभूतेषुकांतिरूपेणसंस्थिता॥नमस्तस्यै५३नम
स्तस्यै५४नमस्तस्यैनमोनमः॥५५॥यादेवीसर्वभूतेषुल
क्ष्मीरूपेणसंस्थिता॥नमस्तस्यै५६नमस्तस्यै५७ नमस्त
स्यैनमोनमः॥५८॥यादेवीसर्वभूतेषुवृत्तिरूपेणसंस्थि
ता॥नमस्तस्यै५९ नमस्तस्यै६० नमस्तस्यैनमोनमः॥६१॥
यादेवीसर्वभूतेषुस्मृतिरूपेणसंस्थिता॥नमस्तस्यै६२
नमस्तस्यै६३ नमस्तस्यैनमोनमः॥६४॥यादेवीसर्वभूते
षुदयारूपेणसंस्थिता॥नमस्तस्यै६५नमस्तस्यै६६नम

स्तस्यैनमोनमः॥६०॥यादेवीसर्वभूतेषुतुष्टिरूपेणसंस्थि
ता॥नमस्तस्यै६१नमस्तस्यै६२नमस्तस्यैनमोनमः॥७०॥
यादेवीसर्वभूतेषुमातृरूपेणसंस्थिता॥नमस्तस्यै७१नम
स्तस्यै७२नमस्तस्यैनमोनमः॥७३॥यादेवीसर्वभूतेषुभ्रांति
रूपेणसंस्थिता॥नमस्तस्यै७४नमस्तस्यै७५नमस्तस्यैन
मोनमः॥७६॥इंद्रीयाणामधिष्ठात्रीभूतानामखिलेषुया
भूतेषुसततंतस्यैव्याप्तिदेव्यैनमोनमः॥७७॥चितिरूपेणा २९
यात्कृत्स्नमेतद्व्याप्यस्थिताजगत्॥नमस्तस्यै७८नमस्तस्यै७९

नमस्तस्यैनमोनमः॥८०॥स्तुतासुरैःपूर्वमभीष्टसंश्रयात्तथा
सुरेंद्रेणादिनेत्रासेविता॥करोतुसानःशुभहेतुरीश्वरीशुभा
निभद्राण्यभिहंतुचापदः॥८१॥यासांप्रतंचोद्धतदैत्यतापि
तैरस्माभिरीशाचसुरैर्नमस्यते॥याचस्मृतातत्क्षणमेवहं
तिनःसर्वापदोभक्तिविनम्रमूर्त्तिभिः॥८२॥ऋषिरुवाच॥
॥८३॥एवंस्तवादियुक्तानांदेवानांतत्रपार्वती॥स्नातुम
भ्याययौतोयेजाह्नव्यानपनंदन॥८४॥सान्रवीत्तान्सुरान्सु
भ्रूर्भवद्भिःस्तूयतेत्रका॥शरीरकोशात्समुद्भूता

न्नवीच्छिवा॥८५॥स्तोत्रंममैतत्क्रियतेशुंभदैत्यनिराकृतैः
दैवैःसमस्तैःसमरेनिशुंभेनपराजिते॥८६॥शरीरकोश
यत्रस्याःपार्वत्यानिःसृतांबिका॥कौशिकीतिसमस्तेषुत
तोलोकेषुगीयते॥८७॥तस्यांविनिर्गतायांतुकृष्णाभूत्सा
पिपार्वती॥कालिकेतिसमाख्याताहिमाचलकृताश्रया
८८॥ततोंबिकांपरंरूपंबिभ्राणंसुमनोहरं॥ददर्शचंडो
मुंडश्चभृत्यौशुंभनिशुंभयोः॥८९॥ताभ्यांशुंभायचाख्या ३९
तासातीवसुमनोहरा॥काप्यास्तेस्त्रीमहाराजभासयंति

हिमाचलं॥९० नैवतादृक्क्वचिद्रूपंदृष्टंकेनचिदुत्तमं॥ज्ञाय
तांकाप्यसौदेवीगृह्यतांचासुरेश्वर॥९१॥स्त्रीरत्नमतीचार्वी
मीद्योतयंतीदिशस्त्विषा॥सातुतिष्ठतिदैत्येंद्रतान्भवान्
द्रष्टुमर्हति॥९२॥यानिरत्नानिमणयोगजाश्वादीनिवैप्रभो
त्रैलोक्येतुसमस्तानिसांप्रतंभानितेगृहे॥९३॥ऐरावतःस
मानीतोगजरत्नंपुरंदरात्॥पारिजाततरुश्चायंनयैवोच्चैः
श्रवाहयः॥९४॥विमानंहंससंयुक्तमेतत्तिष्ठतितेंगणे॥र
त्नभूतमिहानीतंयदासीद्वेधसोद्भवं॥९५॥निधिरेषमहाप

म्भः समानीतोधनेश्वरान्॥ किंजल्किनीदशैचाधिर्मालाम
ग्लानपंकजां॥९६॥ छत्रंतेवारुणंगेहे कांचनश्रावतिष्ठति
तथायंस्यंदनवरीयःपुरासीत्प्रजापतेः॥९७॥ मृत्योरुक्रां
तिरानामग्राक्रीत्वयाहृता॥ पाशःसलिलराजस्य
भ्रातुस्तवपरिग्रहे॥९८॥ निशुंभस्याधिजानाश्वसमस्त
रत्नजातयः॥ वह्निरपिदशैतुभ्यमग्निशौचेयवाससी
९७॥एवंदैत्येंद्ररत्नानिसमस्तान्याहृतानिते॥स्त्रीरत्नमे ३२
षाकल्याणीत्वयाकस्मान्नगृह्यते॥१००॥ऋषिरुवाच॥॥

१॥ निशुम्भेतिवचःशुंभःसतदाचंडमुंडयोः॥ प्रेषयामा
ससुग्रीवंदूतंदैत्यामहासुरं॥२॥ इतिचेतिचवक्तव्यासा ग
त्वावचनान्मम॥यथाचान्येतिसंप्रीत्यातथाकार्यंत्वयालघु॥३॥सतत्रगत्वायत्रास्तेशैलोद्देशेतिशोभने॥सादेवीतां
ततःप्राहश्लक्ष्णंमधुरयागिरा॥४॥दूतोवाच॥ १५
देविदैत्येश्वरःशुंभस्त्रैलोक्येपरमेश्वरः॥दूतोहंप्रेषितस्तेनत्वत्सकाशमिहागतः॥५॥प्रत्याहताहःसर्वासु
यःसदादेवयोनिषु॥निर्जिताखिलदैत्यारिःसयदाह्श्रणु

षतन्॥७॥ममत्रैलोक्यमखिलंममदेवग्रहानुगाः। यज्ञ
भागानहंसर्वानुपाश्नामिपृथक्पृथक्॥८॥त्रैलोक्येवर
रत्नानिममवश्यान्यशेषतः॥तथैवगजरत्नानिरुत्तरैर
रावहं॥९॥क्षीरोदमथनोद्भूतमश्वरत्नंममामरैः॥उच्चै
श्रवससंज्ञंतत्प्रणिपत्यसमर्पितं॥१०॥यानिचान्यानि
दिव्येषुगंधर्वेष्वुरगेषुच॥एत्नभूतानिभूतानितानिमय्ये
वस्त्रीमने॥११॥स्त्रीरत्नभूतांत्वांदेवीलोकेमन्यामहेवयं ३२
सात्वमस्मानुपागच्छयतोरत्नभुजोवयं॥१२॥मांवाममा

नुजंवापिनिशुंभमुरुविक्रमं॥भजत्वंचंचलापांगीरत्नभू
तासिवैयतः॥१३॥परमैश्वर्यमतुलंप्राप्स्यतेमत्परिग्रहात्
एतद्बुध्यासमालोच्यमत्परिग्रहतांव्रज॥१४॥ऋषिरुवाच॥
॥१५॥इत्युक्तासातदादेवीगंभीरांतःस्मिताजगौ॥दुर्गा भ
गवतीभद्राययेदंधार्यतेजगत्॥१६॥श्रीदेव्युवाच॥॥१७
सत्यमुक्तत्वयानात्रमिथ्याकिंचित्त्वयोदितं॥त्रैलोक्याधिप
तिःशुंभोनिशुंभश्चापितादृशः॥१८॥किंत्वत्रयत्प्रतिज्ञा
तंमिथ्यातत्क्रियतेकथं॥श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा

याहूनापुरा॥२७॥योमांजयतिसंग्रामेयोमेदर्पव्यपोहति॥
योमेप्रतिबलोलोकेसमेभर्त्ताभविष्यति॥२८॥तद्गच्छतु
शुंभोत्रनिशुंभोवामहासुरः॥मांजित्वाकिंचिरेणात्रपालि
यतुमेलघु॥२९॥दूतोवाच॥॥३०॥अवलिप्तासिमैवं
त्वंदेवीब्रूहिममाग्रतः॥त्रैलोक्येकःपुमान्नास्तिदृष्ट्वेशुंभ
निशुंभयोः॥३१॥अन्येषामपिदैत्यानांसर्वेदेवानवैयुधि
तिष्ठंतिसंम्मुखेदेवीकिंपुनःस्त्रीत्वमेकिका॥३२॥इंद्राद्या: ३३
सकलादेवास्तस्थुर्येषांनसंयुगे॥शुंभादिनांकथंतेषांस्त्री

प्रयास्यसिसंम्मुखं॥३४॥सात्वंगच्छमयैवोक्तापार्श्वंशुंभनि
शुंभयोः॥केशाकर्षणनिर्द्धूतागौरवान्मागमिष्यसि॥३५॥
श्रीदेव्युवाच॥॥३६॥एवमेतद्बलीशुंभोनिशुंभश्चातिवी
र्यवान्॥किंकरोमिप्रतिज्ञामेयदनालोचितापुरा॥३७॥स
त्वंगच्छमयोक्तंतेयदेतत्सर्वमादृतः॥तद्राचक्ष्वासुरेंद्राय
सचयुक्तंकरोतुयत्॥३८॥इतिश्रीमार्कंडेयपुराणेसावर्णि
कमन्वंतरेदेवीमहात्म्येदूतसंवादोनामपंचमोऽध्यायः॥
॥५॥ ॥छ॥ ॥ ॥ऋषिरुवाच॥ ॥१॥इत्याक

र्यवचोदेव्याःसदूतोमर्षपूरितः॥ समाचष्टेसमागम्यदैत्य
राजायविस्तरात्॥२॥तस्यदूतस्यतद्वाक्यमाकर्ण्यासुर
राट्ततः॥सक्रोधःप्राहदैत्यानामधिपंधूम्रलोचनं॥३॥हेधू
म्रलोचनाशुत्वंस्वसैन्यपरिवारितः॥तामानयबलाद्दुष्टं
केशाकर्षणविह्वलां॥४॥तत्परित्राणदःकश्चिद्यदिवोत्ति
ष्टतेपरः॥सहंतव्योमरोवापियक्षोगंधर्वएवच॥५॥ऋषि
रुवाच॥६॥तेनाज्ञप्तस्ततःशीघ्रंसदैत्योधूम्रलोचनः॥ ३५
वृतःषष्ट्यासहस्राणामसुराणांद्रुतंययौ॥७॥सांदृष्ट्वातां

ततोदेवीतुहिनाचलसंस्थितां॥जगादोच्चैःप्रयाहीतिमूलं
शुंभनिशुंभयोः॥८॥नचेत्प्रीत्याद्यभवतीमद्भर्तारमुपै
ष्यसि॥ततोबलान्नयाम्येषकेशाकर्षणविह्वलां॥९॥श्रीदे
व्युवाच॥ ॥१०॥दैत्येश्वरेणप्रहितोबलवान्बलसंवृतः
बलान्नयसिमामेवंततःकिंतेकरोम्यहं॥११॥ऋषिरुवाच
॥ ॥१२॥इत्युक्तःसोभ्यधावत्तामसुरोधूम्रलोचनः॥
हुंकारेणैवतंभस्मसाच्चकारांबिकाततः॥१३॥अथक्रु
द्धंमहासैन्यमसुराणांततोंबिका॥ववर्षसायकैःतीक्ष्णैः

स्तथान्यान्क्षिपरश्वधैः॥१६॥ततोधूतसटःकोपात्कृत्वानादंसुभैरवं॥पपातासुरसेनायांसिंहोदेव्याःस्ववाहनः॥१७॥
श्चित्करप्रहारेणदैत्यानन्येनचापरान्॥आचम्यचरणेना
न्यान्जघानसुमहासुरान्॥१८॥केषांचित्पाटयामासनखै
कोष्णनिकेसरी॥तथानलःप्रहारेणशिरांसिक्षतवान्॥
पथक्॥१९॥विच्छिन्नबाहुशिरसःकृतास्तेनतथापरे॥पा
पौचरुधिरंकोष्णदन्येषांधुतकेसरः॥१९॥क्षणेनतद्बलं ३५
सर्वंक्षयंनीतंमहात्मना॥तेनकेसरिणादेव्यावाहनेना

निकोपिना॥१९॥दृष्ट्वातमसुरंदेव्यानिहतंधूम्रलोचनं॥बलं
चक्षपितंकृत्स्नंदेविकेसरिणातनुः॥२०॥चुकोपदैत्याधिप
तिःशुंभःप्रस्फुरिताधरः॥आज्ञापयामासचतौचंडामुंडौम
हासुरौ॥२१॥हेचंडहेमुंडबलैर्बहुभिःपरिवारितौ॥तत्रगच्छ
तगत्वाचसासमानीयतांलघु॥२२॥केशेष्वाकृष्यबध्वावा
यदिवःसंशयोयुधिः॥तहत्रोषायुधैःसर्वैरसुरैर्विनिहन्यतां
२३॥तस्यांहतायांदुष्टायांसिंहेचविनिपातिते॥शीघ्रमाग
म्यतांबध्वागृहीत्वातामथांबिकां॥२४॥इतिश्रीमार्कंडेय

पुराणेमार्कंडेयसावर्णिकेमन्वंतरेदेवीमहात्म्येधूम्रलोचनव॰॥प
ष्ठोऽध्यायः॥६॥ ॥छ॥ ॥ऋषिरुवाच॥१
आज्ञप्तास्तुततोदैत्याश्चंडमुंडपुरोगमाः॥चतुरंगबलोपेता
ययुरभ्युद्यतायुधाः॥२॥दृष्ट्वातुतांदेवीसिंहस्थोपरिसंस्थि
तां॥सिंहस्योपरिशैलेंद्रशृंगेमहतिकांचने॥३॥तेद
ष्ट्वातांसमादातुमुद्यमंचक्रुरुद्यताः॥आकृष्टचापासिध
रास्तथान्येतत्समीपगाः॥४॥ततःकोपंचकारोच्चैरंबिका ३६
तानरीन्प्रति॥कोपेनचास्यावदनमसीवर्णमभूत्तदा॥५॥

भ्रकुटीकुटिलात्तस्यालल्लाटफलकाद्रुतं॥कालीकरालवदना
विनिःक्रांतासिपाशिनी॥६॥विचित्रखट्वांगधरानरमालावि
भूषणा॥द्वीपिचर्मपरिधानाशुष्कमांसातिभैरवा॥७॥अ
तिविस्तारवदनाजिह्वाललनभीषणा॥निमग्नारक्तनयना
नादापूरितदिङ्मुखा॥८॥सावेगेनाभिपतिताघातयंतीम
हासुरान्॥सैन्येतत्रसुरारीणामभक्षयततद्बलं॥९॥पार्ष्णि
ग्राहांकुशग्राहियोधघंटासमन्वितान्॥समादायैकहस्तेनमु
खेचिक्षेपवारणान्॥१०॥तथैवयोधंतुरगैरथंसारथिनास

ह्।।निःक्षिप्यवक्त्रेदग्धानेश्चर्वयत्यतिभैरवं।।२१।।एकंजग्राह
केशेषुचीवायमथचापरं।।पादेनाक्रम्यचैवान्यमुरसान्यपो
थयत्।।२२।।तैर्मुक्तानिचशस्त्राणिमहास्त्राणितथासुरैः।।मु
खेनजग्राहरुषादग्धानैर्मथितान्यपि।।२३।।बलीनांतद्बलंसर्वं
मसुराणांमहात्मनां।।समर्द्दीमक्षयंज्ञात्वान्यांश्चातादृयन्नथा
२४।।असिनानिहताःकेचित्केचित्खट्वांगताडिताः।।जग्मुर्वि
नाशमसुरादंताग्रैर्निहतास्तथा।।२५।।क्षणेनतद्बलंसर्वंमसु
राणांनिपातितं।।दृष्ट्वाचंडोमिदुद्रावतांकालीमतिभीषणं।।२६

नारवर्षैर्महाभीमैर्भीमाक्षीतांमहासुरः।।ऊदयामासचक्रेण
मुंडश्छिन्नैःसहस्रशः।।२७।।तानिचक्राण्यनेकानिविशमाना
नितन्मुखं।।बभुर्यथार्कबिंबानिसुबहूनिघनोदरं।।२८।।ततो
जहासातिरुषाभीमंभैरवनादिनी।।कालीकरालवक्त्रांतर्दु
र्दर्शदशनोज्ज्वला।।२९।।उत्थायचमहासिंहंदेवीचंडमधावत
गृहीत्वाचास्यकेशेषुशिरस्तेनासिनाच्छिनत्।।३०।।अथमुंडो
भ्यधावत्तांदृष्ट्वाचंडंनिपातितं।।तमप्यपातयद्भूमौसाखड्ग
निहतंरुषा।।३१।।हतशेषंततःसैन्यंदृष्ट्वाचंडंनिपातितं।।

मुंडंचसुमहावीर्यंदिशोभेजेभयातुरं॥२३॥शिरश्चंडस्यकाली
खड्गग्रहीत्वामुंडमेवच॥प्राहप्रचंडाट्टहासमिश्रमभ्येत्यचं
डिकां॥२४॥मयानवाभ्योपहृतौचंडमुंडौमहापशून्॥युद्धय
ज्ञेस्वयंशुंभंनिशुंभंचहनिष्यसि॥२५॥ऋषिरुवाच॥ ॥२५
तावानीतौततोदृष्ट्वाचंडमुंडौमहासुरौ॥उवाचकालीकल्या
णीललितंचंडिकावचः॥२५॥यस्माच्चंडंचमुंडंचगृहीत्वात्व
मुपागताः॥चामुंडेतिततोलोकेख्यातादेविभविष्यसि॥२७ २९
इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमहात्म्येचं

उमुंडवधः॥सप्तमोऽध्यायः॥७॥॥ऋषिरुवाच॥ ॥१
चंडेचनिहतेदैत्येमुंडेचविनिपातिते॥बहुलेषुचसैन्येषुक्षपि
तेष्वसुरेश्वर॥२॥ततःकोपपराधीनचेताःशुंभःप्रतापवान्
उद्योगंसर्वसैन्यानांदैत्यानामादिदेशह॥३॥अद्यसर्वबलैर्दै
त्याःषडशीतिरुदायुधाः॥कंबूनांचतुराशीतिर्निर्यांतुस्वबलै
र्वृताः॥४॥कोटिवीर्याणिपंचाशदसुराणांकुलानिवै॥शतंकु
लानिधूम्राणांनिर्गच्छंतुममाज्ञया॥५॥कालिकादौहतामौ
र्याःकालकेयास्तथासुराः॥युद्धायसज्जानिर्यांतुममाज्ञयात्व

रितामम॥६॥इत्याकाप्यासुरपतिःशुंभोभैरवशासनः॥निर्ज
गाममहासैन्यसहस्रैर्बहुभिर्वृतः॥७॥आयांतंचंडिकादृष्ट्वा
तत्सैन्यमतिभीषणं॥ज्यास्वनैःपूरयामाससहस्रैर्बहुभिर्वृतः
॥८॥ततःसिंहोमहानादमतीवकृतवान्नृप॥घंटास्वनेनतन्नाद
मंबिकाचोपबृंहयत्॥९॥धनुर्ज्यासिंहघंटानांनादापूरितदि
ङ्मुखः॥निनादैर्भीषणैःकालीजिह्वैःविस्तारिताननाः॥१०॥
तन्निनादमुपश्रुत्यदैत्यसैन्यैश्चतुर्दिशं॥देवीसिंहस्तथाका ३९
लीसरोषैःपरिवारिताः॥११॥एतस्मिन्नंतरेभूपविनाशाय

सुरद्विषां॥भवायामरसिंहानामतिवीर्यबलान्विताः॥१२॥ब्र
ह्मेशगुहविष्णूनांतथेंद्रस्यचशक्तयः॥शरीरेभ्योविनिष्क्रम्य
तद्रूपैश्चंडिकांययुः॥१३॥यस्यदेवस्ययद्रूपंयथाभूषणवाह
नं॥तद्वदेवहिनष्ठक्तिरसुरान्योद्धुमाययौ॥१४॥हंसयुक्त
विमानाग्रेसाक्षसूत्रकमंडलुः॥आयातानह्मणःशक्तिर्ब्र
ह्माणीसाभिधीयते॥१५॥माहेश्वरीवृषारूढात्रिशूलवरधा
रिणी॥महाहिवलयाचंद्ररेखाविभूषणा॥१६॥कौमा
रिशक्तिहस्ताचमयूरवरवाहना॥योद्धुमभ्याययौदैत्यानं

विकायूहरूपिणी॥१७॥तथैववैष्णवीशक्तिर्गरुडोपरिसंस्थि
ता॥शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपायधौ॥१८॥यज्ञवा
राहमतुलंरूपंयाबिभ्रतोहरेः॥शक्तिःसाप्यायधौतत्रवा
राहिबिभ्रतीतनुं॥१९॥नारसिंहिनृसिंहस्यबिभ्रतिसदृशं
वपुः॥प्राप्तात्रसराक्षेपक्षिप्तनक्षत्रसंहतिः॥२०॥वज्रह
स्तातथैवेंद्रीगजराजोपरिस्थिताः॥प्राप्तासहस्रनयनाय
थाशक्रस्तथैवसा॥२१॥ततःपरिवृतस्तासिरीशानोदेवशा
क्तिभिः॥हन्यंतामसुराःशीघ्रममप्रीत्याहचंडीका॥२२॥

ततोदेवीशरीरात्तुविनिष्क्रांतातिभीषणा॥चंडिकाशक्ति
स्तुत्राशिवाशतनिनादिनी॥२३॥साचाहधूम्रजटिलमीशा
नमपराजिता॥दूतंत्वंगच्छभगवन्पार्श्वंशुंभनिशुंभयोः॥२४॥
यहिशुंभनिशुंभंचसानवावतिगर्वितौ॥येचान्येदानवास्तत्र
युद्धायसमुपस्थिताः॥२५॥त्रैलोक्यमिंद्रोलभतांदेवासंतुह
विर्भुजः॥यूयंप्रयातपातालंयदिजीवितुमीछथ॥२६॥बल
वलेपादथचेद्भवंतोयुद्धकांक्षिणः॥ततागछतुत्प्यंतुम
छिवाःपिशितेनवाः॥२७॥यतोनियुक्तोदैत्येननयादेव्याशि

वःस्वयं।।शिवदूतितीलोकेस्मिन्नूस्तनःसाख्यानिमागताः।।
२९।।तेपिश्रुत्वाववोदैत्याःसर्वाख्यानंमहासुराः।।ऋमर्षपू
रिताजग्मुर्यत्रकात्यायनीस्थिता।।२९।।ततःप्रथममेवाग्रे
ऽरुणरूपंमहद्दिविः।ववर्षुरुद्धतामर्षास्तांदेवीममरार
यः।।३०।।साचतान्प्रहितान्बाणान्शूलचक्रपरश्वधान्
शिक्षेदलीलयाधानधनुर्मुक्तैर्महेषुभिः।।३१।।तस्याग्रत
स्तथाकालीशूलपातविदारिनान्।खट्वांगपोथिनांश्चारी४ ४२
कुर्वतिव्यचरद्रणे।।३२।।कमंडलुजलाक्षेपहतवीर्यान्महा

नोजसः।।ब्रह्माणीचाकरोच्छत्रूंस्तेनयेनास्मधावति।।३३।।
माहेश्वरीत्रीशूलेनतथाचक्रेणवैष्णवी।दैत्यान्जघानकौ
मारीतथाशक्तिकोपना।।३४।।ऐंद्रीकुलीशपातेनशतशो
दैत्यदानवाः।।पेतुर्विदारिताःक्षुण्णोरुधिरौघप्रवर्षिणः।।३५
तुंडप्रहारविध्वस्तादंष्ट्राग्रक्षतवक्षसः।।वराहमूर्त्यान्यपत
श्चक्रेणचविदारिताः।।३६।।नखैर्विदारिताश्चान्यान्भक्षयं
तीमहासुरान्।।नारसिंहीचचाराजौनादापूरितदिङ्मुखा।।
३७।।चंडाट्टहासैरसुराःशिवदूत्याभिदूषिताः।।पेतुःपृथिव्यां

पतिनांस्तोश्वरवाराथसानदा॥४९॥इतिमातृगणंक्रुद्धंमर्द
यंतंमहासुरान्॥दृष्ट्वाभ्यपायैर्विविधैर्नेषुरेवारिसैनिकान्
॥५०॥पलायनपरान्दृष्ट्वादैत्यान्मातृगणार्दितान्॥यो
ऽभ्यायययौक्रुद्धोरक्तबीजोमहासुरः॥५१॥रक्तबिंदुर्यदा
भूमौपतत्यस्यशरीरतः॥समुत्पतंतिमेदिन्यांतत्प्रमाणोमहा
सुरः॥५२॥युयुधेसगदापाणिरिंद्रशक्तिमहासुरः॥ततश्चै
ंद्रीस्ववज्रेणरक्तबीजमताडयत्॥५३॥कुलिशेनाहतस्या
श्रुतस्याशुस्रावशोणितं॥समुत्तस्थुस्ततोयोधास्तद्रुपा॥ ५२

स्तत्पराक्रमाः॥५४॥यावंतपतितास्तस्यशरीराद्रक्तबिंदवः॥
तावंतःपुरुषाजातास्तद्वीर्यबलविक्रमाः॥५५॥तेचापियु
युधुःसत्रपुरुषारक्तसंभवाः॥समंमातृभिरत्युग्रास्त्रपा
तानतिभीषणं॥५६॥पुनश्चवज्रपातेनक्षतमस्यशिरोयदा॥
ववाहरक्तंपुरुषास्ततोजाताःसहस्रशः॥५७॥वैष्णवीसम
रेचैनंचक्रेणाभिजघानह॥तस्याताडयमासेंद्रीनमुरे
श्वरं॥५८॥वैष्णवीचक्रभिन्नस्यरुधिरस्रावसंभवैः॥सहस्र
शोजगद्व्याप्तंतत्प्रमाणैर्महासुरैः॥५९॥ब्राह्मीजघानकौमारी

वाराहीचतथासिना।।माहेश्वरीत्रिशूलेनरक्तबीजंमहासुरं।।५०
सचापिगदयादैत्यःसर्वाएवाहनत्पृथक्।।मातृकोपसमा
विष्टोरक्तबीजोमहासुरः।।५१।।तस्याहतस्यबहुधाशक्ति
शक्तिभिर्भुवि।।पपातयोवैरक्तौघस्तेनासंछतसोसुराः।।५२
तैश्चासुरासृक्संभूतैरसुरैःसकलंजगत्।।व्याप्तमासीत्ततो
देवाभयमाजग्मुरुत्तमं।।५३।।तान्विषण्णान्सुरादृष्ट्वाचंडि
काप्राहसत्वरं।।उवाचकालींचामुंडेविस्तरंवदनंकुरु।।५४ ४३
संभक्षत्रपातसंभूतान्रक्तबिंदुन्महासुरान्।।रक्तबिंदोःप्रति



धत्वंवक्त्रेणानेनवेगिना।।५५।।भक्षयंतीचररणेनदुत्पन्ना
न्महासुरान्।।एवमेषक्षयंदैत्यःक्षीणरक्तोगमिष्यति।।५६
भक्षमाणास्त्वयाचोग्रानचोत्पत्स्यंतिचापरे।।इत्युक्त्वातां
तोदेवीशूलेनाभिजघानतं।।५७।।मुखेनकालीजग्राहरक्त
जस्यगोलितं।।ततोसावाजघानाथगदयातत्रचंडिकां।।५८
नचास्यावेदनांचक्रेगदापातोल्पिकामपि।।तस्याहतस्यदे
हान्बहुबहुस्रावशोणितं।।५९।।यतस्ततःस्ववक्त्रेणचामुं
डासंप्रतिच्छति।।मुखेनसहतोयेस्यारक्तपानान्महासुराः।।६०

तांश्चखादाथचामुंडापपौतस्यचशोणितं।देवीशूलेनवज्रेण
णबाणैरसिभिर्ऋष्टिभिः॥ ६॥जघानरक्तबीजंतंचामुंडापी
तशोणितं।सपपानमहीपृष्ठेशस्त्रसंघसमाहतः॥ ६०॥निर
क्तश्चमहीपालरक्तबीजोमहासुरः॥ततस्तेहर्षमतुलमवा
पुस्त्रिदशान्नृप॥ ६१॥तेषांमातृगणोजातोननर्त्तासृग्मदो
द्धतः॥ ६२॥इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवी
महात्म्येरक्तबीजवधः॥अष्टमोऽध्यायः॥ ८॥ ॥छ॥ १ ५६

ऋषिरुवाच॥ १॥विचित्रमिदमाख्यातंभगवान्भवतां
राजा

मार्ण्डेयपुराणेसावर्णिकेमन्वंतरेदेवीमहात्म्येशुंभवधाश्रितं॥ २॥भूयश्चेच्छा
म्यहंश्रोतुंरक्तबीजेनिपातिते॥चकारशुंभोयत्कर्मनिशुंभश्चातिकोपनः॥ ३॥ऋषिरुवाच॥ ॥ ४॥चकारकोपमतु
लंरक्तबीजेनिपातिते॥शुंभासुरोनिशुंभश्चहतेष्वन्येषुचाहवे॥ ५॥हन्यमानंमहासैन्यंविलोक्यामर्षमुद्वहन्॥अभ्य
धावन्निशुंभोथमुख्यायासुरसेनया॥ ६॥तस्याग्रतस्तथा
कालीपार्श्वयोश्चमहासुराः॥संदष्टौष्ठपुटाःक्रुद्धाहंतुंदे
वीमुपाययुः॥ ७॥आजगाममहावीर्यःशुंभोपिस्वबलैर्वृ

नः॥ निहंतुंचंडिकांकोपात्कृत्वायुद्धंतुमात्मभिः॥ ९॥ ततोयु
द्धमतीवासीद्देव्याःशुंभस्यचोभयोः॥ शरवर्षमतीवोग्रंमेघ
योरिववर्षतीः॥ १०॥ चिच्छेदास्तांश्छरांस्ताभ्यांचंडिकाधुशरो
त्करैः॥ ताडयामाससर्वांगेष्वस्त्रौघैरसुरेश्वरौ॥ ११॥ निशुं
भोनिशितंखड्गंचर्मचादायसुप्रभं॥ अताडयन्मूर्ध्निसिंहंदेव्या
वाहनमुत्तमं॥ १२॥ ताडितेवाहनेदेवीक्षुरप्रेणासिमुत्तमं
निशुंभस्याशुचिच्छेदचर्मचाप्यष्टचंद्रकं॥ १३॥ छिन्नेचर्म ४५
णिखड्गेचशक्तिंचिक्षेपसोसुरः॥ तामप्यस्यद्विधाचक्रेचक्रे

णाभिमुखागतां॥ २३॥ कोपध्मातोनिशुंभोथशूलंजग्राहदा
नवः॥ आयांतंमुष्टिपातेनदेवीतच्चाप्यचूर्णयत्॥ २४॥ आवि
ध्याथगदांसोपिचिक्षेपचंडिकांप्रति॥ सापिदेव्यास्त्रिशूलेन
भिन्नाभस्मत्वमागता॥ २५॥ ततःपरशुहस्तंतमायांतंदैत्य
पुंगवं॥ आहत्यदेवीबाणौघैरपातयन्महीतले॥ २६॥ तस्मि
न्निपतितेभूमोनिशुंभेभीमविक्रमे॥ भ्रातर्यतीवसंक्रुद्धःप्र
ययौहंतुमंबिकां॥ २७॥ सरथस्तस्तथात्युच्चैर्गृहीतपरमायुधै
र्भुजैरष्टाभिरतुलैर्व्याप्यारोषंबभौनभः॥ २८॥ तमायांतंस

मालोक्यदेवीगंखमवारयत्।।न्यनादंचापिधनुष्यकारा
तीवदुःसहं।।९९।।दूरयामासककुभोनिजघंटास्वनेनच।।
समंस्तदैत्यसैन्यानांतेजोवधविधायिनी।।१००।।ततःसिंहोम
हानादैस्त्याजितेभमहामदैः।।दूरयामासगगनंगांतथैवदि
शोदश।।१०१।।ततःकालीसमुत्पत्यगगनंक्ष्मामताडयत्।।
कराभ्यांतन्निनादेनप्राक्स्वनास्तेनिरोहिताः।।१०२।।अट्ट
अट्टहासमशिवंशिवदूतीचकारह।।तैरुग्रैरसुरास्त्रेषुशुंभः। ५६
कोपंपरंययौ।।१०३।।दुरात्मंस्तिष्ठतिष्ठेतिव्याजहारांबिका

यदा।।तदाजयेत्यभिहितंदेवैराकाशसंस्थितैः।।१०४।।शुंभे
नागत्ययाशक्तिर्मुक्ताज्वालातिभीषणा।।आयांतिवह्निकू
टाभासानिरस्तामहोल्कया।।१०५।।सिंहनादेनशुंभस्यव्या
प्तलोकत्रयांतरं।।निर्घातनिस्वनोघोरोजितवानवनीपतेः।।
१०६।।शुंभमुक्तांश्चरान्देवीशुंभस्तत्प्रहितान्शरान्।।चिच्छेद
स्वशरैरुग्रैःशतशोथसहस्रशः।।१०७।।ततःसाचंडिकाक्रुद्धा
शूलेनाभिजघानतं।।सतदाभिहतोमूर्छिनोनिपपा
तह।।१०८।।ततोनिशुंभःसंप्राप्यचेतनामात्तकार्मुकः।।आ

जघानशरैर्देवीकालीकेसरिणंतथा॥२९॥पुनश्चकृत्वाबाहू
नामयुतंदनुजेश्वरः॥चक्रायुधेनदितिजश्छादयामासचंडि
कां॥३०॥ततोभगवतीक्रुद्धादुर्गादुर्गार्तिनाशिनी॥चिच्छेदत
निचक्राणिस्वशरैःसायकांश्चतान्॥३१॥ततोनिशुंभोवेगेन
गदामादायचंडिकां॥अभ्यधावतवैहंतुंदैत्यसैन्यसमावृतः
३२॥तस्यापततएवाशुगदांचिच्छेदचंडिका॥खड्गेनसितधारे
णसचशूलंसमाददे॥३३॥शूलहस्तंसमायांतंनिशुंभममरा ५७
र्दनं॥हृदिविव्याधशूलेनवेगाविद्धेनचंडिका॥३४॥निस्त्रस्य

नस्यशूलेनहृदयान्निसृतोपरः॥महाबलोमहावीर्यस्तिष्ठेति
पुरुषोवदन्॥३५॥तस्यनिःक्रामतोदेवीप्रहस्यस्वनवन्न
तः॥शिरश्चिच्छेदखड्गेननतोसावापतद्भुवि॥३६॥ततसिं
हश्चखादोग्रान्दंष्ट्राक्षुण्णशिरोधरान्॥असुरांस्तांस्तथा
कालीशिवदूतीतथापरान्॥३७॥कौमारीशक्तिनिर्भिन्नाःके
चिन्नेपुर्महासुराः॥ब्रह्माणीमंत्रपूतेनतोयेनान्येनिराकृताः
३८॥माहेश्वरीत्रिशूलेनभिन्नाःपेतुस्तथापरे॥वाराहीतुंड
घातेनकेचिच्चूर्णीकृताभुवि॥३९॥खंडंखंडंचचक्रेणवैष्ण

ध्यासनवाहनाः॥ वज्रेणचैंद्रीहस्तायविमुक्तेनतथापरे॥५॥
केचिद्विनेशुरसुराःकेचिन्नष्टामहाहवात्॥भक्षीताश्चापरेक
लीश्रिवद्दनिमगाधिपैः॥५२॥इतिमार्कंडेयपुराणेसावर्णि
केमन्वंतरेदेवीमहात्म्येशुंभवधः॥नवमोऽध्यायः॥९॥
ऋषिरुवाच॥ ॥१॥निशुंभंनिहतंदृष्ट्वाभ्रातरंप्राणसम्मि
तं॥हन्यमानंबलंचैवशुंभःक्रुद्धोब्रवीद्वचः॥२॥बलावलेप ५८
दुष्टेत्वंमादुर्गेगर्वमावह॥अन्यासांबलमाश्रित्ययुध्यसे
याभिमानिनी॥३॥श्रीदेव्युवाच॥४॥एकैवाहंजगत्यत्र

द्वितीयाकाममापरा॥पश्यैतादुष्टमय्येवविशंत्योमद्विभू
तयः॥५॥ततःसमस्तास्तादेव्योब्रह्माणीप्रमुखालयं॥तस्या
देव्यास्तनोज्जग्मुरेकैवासीत्तदांबिका॥६॥देव्युवाच॥ ॥७
॥अहंविभूत्याबहुभिरिहरूपैर्यदास्थिताः॥तत्संहृतंमयैकैव
निष्ठम्याजौस्थिरोभव॥७॥ऋषिरुवाच॥ ॥८॥ततःप्रववृते
युद्धंदेव्याःशुंभस्यचोभयोः॥पश्यतांसर्वदेवानांमसुराणां
चदारुणं॥९॥शरवर्षैःशितैःशस्त्रैस्तथास्त्रैश्चैवदारुणैः॥
ततोयुद्धमभूद्भूयःसर्वलोकभयंकरं॥१०॥दिव्यान्यस्त्राणि

ग्रानशोमुमुचेचान्यथांबिका।। बभंजतानिदैत्येंद्रस्तत्प्रतिघा
तकर्तृभिः॥१२॥मुक्तानितेनचास्त्राणिदिव्यानिपरमेश्वरी
बभंजलीलयैवोग्रहुंकारोच्चारणादिभिः॥१३॥ततःशरशते
र्देवीमाच्छादयतसोऽसुरः॥सोपितत्कुपितादेवीधनुश्चिच्छेद
सायकैः॥१४॥छिन्नेधनुषिदैत्येंद्रस्तथाशक्तिंसमाददे॥चिच्छे
ददेवीचक्रेणतामप्यस्यकरस्थितां॥१५॥ततःखड्गमुपादाय
तंचंद्रंचभानुमत्॥अभ्यधावत्तदादेवीदैत्यानामधिपेश्वरः॥ ५९
१६॥तस्यापततएवाशुखड्गंचिच्छेदचंडिका॥धनुर्मुक्तैःशरैर्ब

णैश्चर्मचार्ककरामलं॥१७॥हताश्वःसतदादैत्यश्छिन्नधन्वा
विसारथिः॥जग्राहमुद्गरंघोरमंबिकानिधनोद्यतः॥१८॥चि
च्छेदापततस्तस्यमुद्गरंनिशितैःशरैः॥तथापिसोभ्यधाव
त्तांमुष्टिमुद्यम्यवेगवान्॥१९॥समुष्टिंपातयामासहृदयेदैत्य
पुंगवः देव्यास्तंचापिसादेवीतलेनोरस्यताडयत्॥२०॥तल
प्रहाराभिहतोनिपपातमहीतले॥सदैत्यराजःसहसापुनरेवत
थोत्थितः॥२१॥उत्पत्यचप्रगृह्योच्चैर्देवीगगनमास्थितः॥त
त्रापिसानिराधारायुयुधेतेनचंडिका॥२२॥नियुद्धंखेनतदादै

स्यश्चंडिकाचपरस्परं॥चक्रतुःपरमंयुद्धंमुनिविस्मयकारकं
२३॥ततोनियुद्धंसुचिरंकृत्वातेनांबिकासह॥उत्पत्यभ्राम
यामासचिक्षेपधरणीतले॥२४॥सक्षिप्तोधरणीप्राप्यमुहि
मुहुर्म्यवेगतः॥अभ्यधावतदुष्टात्माचंडिकानिधनेच्छया
२५॥तमायांतंसमालोक्यसर्वदैत्यजनेश्वरं॥जगत्यांपात
यामासनिहत्याशूलेनवक्षसि॥२६॥सगतासुःपपातोर्व्यांदिवी
शूलाग्रविक्षतः॥चालयन्सकलांपृथ्वींसाब्धिद्वीपांसपर्व ५९
तां॥२७॥ततःप्रसन्नमखिलंहतेतस्मिन्दुरात्मनि॥जगत्स्वा

स्थ्यमतीवापनिर्मलंचाभवन्नभः॥२८॥उत्पातमेघाःसोल्का
येप्रागासंस्तेसमंययुः॥सरितोमार्गवाहिन्यस्तथासंस्तत्र
पातिनि॥२९॥ततोदेवगणाःसर्वेहर्षनिर्भरमानसाः॥बभूवु
र्निहतेतस्मिन्गंधर्वाललितंजगुः॥३०॥अवादयंस्तथैवान्ये
ननृतुश्चाप्सरोगणाः॥ववुःपुण्यास्तथावातासुप्रभोभूद्दिवा
करः॥३१॥जज्वलुश्चाग्नयःशांताःशांतादिग्जनितःस्वनाः
३२॥इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमहात्म्येशु
मवधःनामोऽध्यायः॥१३॥ ॥छ॥ ॥छ॥

ऋषिरुवाच॥१॥एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनद्भवैः।
प्रोवाच प्रणताञ्छक्रादीन्प्रहसन्ती सुरेश्वरी॥२॥देव्युवाच॥
व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम्॥३॥देवा ऊचुः॥
सर्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि।एवमेव त्वया कार्यमस्मद्वैरिविनाशनम्॥४॥
देव्युवाच॥वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे।शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ॥५॥
नन्दगोपगृहे जाता यशोदागर्भसम्भवा।ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी॥६॥
पुनरप्यतिरौद्रेण रूपेण पृथिवीतले।अवतीर्य हनिष्यामि वैप्रचित्तांस्तु दानवान्॥७॥
भक्षयन्त्याश्च तानुग्रान्वैप्रचित्तान्महासुरान्।रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः॥८॥
ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः।स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम्॥९॥
भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि।मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा॥१०॥
ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन्।कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः॥११॥
ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः।भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः॥१२॥
शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि।तथा तीक्ष्णेन दुर्गाख्यं दुर्गमाख्यं महासुरम्॥१३॥
दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति।यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति॥१४॥
तदाहं भ्रामरं रूपं कृत्वाऽसंख्येयषट्पदम्।त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम्॥१५॥
भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः।तस्यामेवं प्रभावायां सृष्टौ स्वाहा॥१६॥
स्वधा॥१७॥स्वरूपा॥१८॥रक्षांसि यक्षिष्यति॥१९॥

नांशक्तिभूतेसनातनि।गुणाश्रयेगुणमयेनारायणि।नमोस्तुते॥१४॥शरणागतदीनार्त्तपरित्राणपरायणे।सर्वस्यार्त्तिहरेदेविनारायणि॥१५॥हंसयुक्तविमानस्थेब्रह्माणीरूपधारिणी।कौशांभःक्षरिकेदेविनारायणि॥१६॥त्रिशूलचंद्राहिधरेमहावृषभवाहिनि।माहेश्वरीस्वरूपेणनारायणि॥१७॥मयूरकुक्कुटवृतेमहाशक्तिधरेनघे।कौमारीरूपसंस्थानेनारायणि॥१८॥शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे।प्रसीदवैष्णवीरूपेनारायणि॥१९॥गृहीतोग्रमहाचक्रेदंष्ट्रोद्धृतवसुंधरे।वाराहरूपिणिशिवेनारायणि॥२०॥ ५२

नृसिंहरूपेणोग्रेणहंतुंदैत्यान्नमोस्तुते।त्रैलोक्यत्राणसहितेनारायणि॥२१॥किरीटिनिमहावज्रेसहस्रनयनोज्ज्वले।वृत्रप्राणहरेचैंद्रीनारायणि॥२२॥शिवदूतीस्वरूपेणहतदैत्यमहाबले।घोररूपेमहारावेनारायणि॥२३॥दंष्ट्राकरालवदनेशिरोमालाविभूषणे।चामुंडेमुंडमथनेनारायणि॥२४॥लक्ष्मीलज्जेमहाविद्येश्रद्धेपुष्टिस्वधेध्रुवे।महारात्रिमहाविद्येनारायणि॥२५॥मेधेसरस्वतीवरेभूतिबाभ्रवितामसि।नियतेत्वंप्रसीदेशेनारायणि॥२६॥सर्वस्वरूपेसर्वेशेसर्वशक्तिसमन्विते।भयेभ्य

स्त्राहि नोरेवीदुर्गेरिवनमोस्तुते।२५।एतत्तेवदनंसौम्यं
लोचनत्रयभूषितं।पातुनःसर्वभीतेभ्यःकात्यायनिन
मोस्तुते।२६।ज्वालाकरालमत्युग्रमशेषासुरसूदनं।त्रि
शूलंपातुनोभीतेर्भद्रकालिनमोस्तुते।२७।हिनस्तिदैत्य
तेजांसिस्वनेनापूर्ययाजगत्।सांघंटापातुनोदेविपापेभ्यो
नःसुतानिव।२८।असुरासृग्वसापंकचर्चितस्तेकरोज्व
लः।शुभायखड्गोभवतुचंडिकेत्वांनताव्यं।२९।रोगान ५३
शेषानपहंसितुष्टारुष्टातुकामान्सकलानभीष्टान्।

त्वामाश्रितानांनविपन्नराणंत्वामाश्रिताह्याश्रयतांप्रयां
ति।३०।एतत्कृतंयत्कदनंत्वयाद्यधर्मद्विषांदेविमहासु
राणां।रूपैरनेकैर्बहुधात्ममूर्तिंकृत्वाबिकेतत्प्रकरोतिका
न्या।३१।विद्यासुशास्त्रेषुविवेकदीपेष्वाद्येषुवाक्येषुचका
वदन्या।।ममत्वगर्तेतिमहांधकारेविभ्रामयत्येतदतीव
विश्वं।३२।रक्षांसियत्रोग्रविषाश्चनागायत्राद्यो दस्युब
लानियत्र।दावानलोयत्रतथाब्धिमध्येतत्रस्थितात्वंप
रिपासिविश्वं।३३।विश्वेश्वरीत्वंपरिपासिविश्वंविश्वात्मि

काधारयसीतिवीश्वं॥विश्वेशावंद्यामवतीमवंतीविश्वाश्रया
येत्वयिभक्तिनम्राः॥३३॥देविप्रसीदपरिपालयनोरिभी
तेर्नित्ययथासुरवधादधुनैवसद्यः॥पापानिसर्वजगतांप्र
शमंनयाशुउत्पातपाकजनितांश्चमहीपसर्गान्॥३४॥प्रणा
तानंप्रसीदत्वंदेविविश्वार्त्तिहारिणी॥त्रैलोक्यवासिनामीड्ये
लोकानंवरदाभव॥३५॥श्रीदेव्युवाच॥ ॥३६॥वरदाहं
सुरगणावरंयन्मनसेच्छथ॥तंवृणुध्वंप्रयच्छामिजगतामु ५५
पकारकं॥३७॥देवाऊचुः॥ ३८॥सर्वाबाधाप्रशमनंत्रैलोक्य

स्याखिलेश्वरि॥एवमेवत्वयाकार्यमस्मद्वैरिविनाशनं॥३९॥
देव्युवाच॥४०॥वैवस्वतेंतरेप्राप्तेअष्टाविंशतिमेयुगे॥शुं॥
भोनिशुंभश्चैवान्यावुत्पत्स्येतेमहासुरौ॥४१॥नंदगोपगृहेजा
तायशोदागर्भसंभवा॥ततस्तौनाशयिष्यामिविंध्याचलनि
वासिनी॥४२॥पुनरप्यतिरौद्रेणरूपेणपृथिवीतले॥अव
तीर्यहनिष्यामिवैप्रचित्तांस्तुदानवान्॥४३॥भक्षयंत्याश्च
तानुग्रान्वैप्रचित्तान्महासुरान्॥रक्तदंतास्तदाभविष्यंतिदाडिमी
कुसुमोपमाः॥४४॥ततोमांदेवताःस्वर्गेमर्त्यलोकेचमानवाः

स्तवंतोव्याहरिष्यंतिसततंरक्तदंतिकां॥४५॥शूयश्चशत
वार्षिक्यामनावृष्यामनंभसि॥मुनिभिःसंस्तुताभूमौसं
भविष्यामयोनिजा॥४६॥ततःशतेननेत्राणांनिरीक्षिष्या
मियन्मुनीन्॥कीर्त्तयिष्यंतिमनुजाःशताक्षीमितिमांततः
४७॥ततोहमखिलंलोकमात्मदेहसमुद्भवैः॥भविष्यामि
सुराःसाकैरावृष्टेःप्राणधारकैः॥४८॥शाकंभरीतिविख्यात
तदायास्याम्यहंभुवि॥तत्रैववधिष्यामिदुर्गमाख्यंमहासु ५५
रं॥४९॥दुर्गादेवीतिविख्यातंतन्मेनामभविष्यति॥पुनश्च

हंयदाभीमंरूपंकृत्वाहिमाचले॥५०॥रक्षांसिभक्षयिष्यामि
मुनीनांत्राणकारणात्॥तदामांमुनयःसर्वेस्तोष्यंत्यान
म्रमूर्त्तयः॥५१॥भीमादेवीतिविख्यातंतन्मेनामभविष्यति
यदारुणाख्यस्त्रैलोक्येमहाबाधांकरिष्यति॥५२॥तदाहंभ्रा
मरंरूपंकृत्वासंख्येयषट्पदं॥त्रैलोक्यहितार्थायवधिष्या
मिमहासुरं॥५३॥भ्रामरीतिचमांलोकास्तदास्तोष्यंतिसर्व
तः॥एवंयदायदाबाधादानवोत्थाभविष्यति॥५४॥तदा
तदावतीर्याहंकरिष्याम्यरिसंक्षयं॥५५॥इतिमार्कंडेय

रतोसावर्तिकेमन्वंतरेदेवीमहात्म्यनारायणीस्तुतिः॥एका
दशोध्यायः॥११॥ऋषिरुवाच॥१॥एभिःस्तवैश्चमांनित्यं
स्तोष्यंतेयःसमाहितः॥तस्याहंसकलांबाधांशमयिष्या
म्यसंशयं॥२॥मधुकैटभनाशंचमहिषासुरघातनं॥की
र्तयिष्यंतियेतद्वद्धंशुंभनिशुंभयोः॥३॥अष्टम्यांचचतु
र्दश्यांनवम्यांचैकचेतसः॥श्रोष्यंतिचैवयेभक्त्यामम्माहा
त्म्यमुत्तमं॥४॥नतेषांदुष्कृतंकिंचिद्दुष्कृतोत्थानचापरः॥ ५६
भविष्यतिनदारिद्र्यंनचैवेष्टवियोजनं॥५॥शत्रुतोनभयं

स्यदस्युतोवानराजतः॥नशस्त्रानलतोयौघात्कदाचित्सं
भविष्यति॥६॥तस्मान्ममैतन्माहात्म्यंपठितव्यंसमाहितैः
श्रोतव्यंचसदाभक्त्यापरंस्वस्त्ययनंहितत्॥७॥उपसर्ग
नशेषांस्तुमहामारीसमुद्भवान्॥तथात्रिविधमुत्पातंमहा
त्म्यंसमयेममा॥८॥यत्रैतत्पठ्यतेसम्यक्नित्यमायतने
मम॥सदानतद्विमोक्षामिसान्निध्यंतत्रमेस्थितं॥९॥बलि
प्रदानेपूजायामग्निकार्येमहोत्सवे॥सर्वंममैतच्चरित मु
च्चार्यंश्राव्यमेवच॥१०॥जानताजानतावापिबलिपूजां

तथाकृतं॥प्रतीछिष्याम्यहंप्रीत्यावह्निहोमंतथाकृतं॥९१
प्रारब्धेमहापूजाक्रियतेयाचवार्षिकी॥तस्यांममैतन्म
हात्म्यंश्रुत्वाभक्तिसमन्वितः॥९२॥सर्वाबाधाविनिर्मुक्तो
धनधान्यसुतान्वितः॥मनुष्योमत्प्रसादेनभविष्यति
नसंशयः॥९३॥श्रुत्वाममैतन्महात्म्यंतथाचोत्पन्नयैः
शुभाः॥पराक्रमंचयुद्धेषुजायतेनिर्भयःपुमान्॥९४॥रि
पवःसंक्षयंयांतिकल्याणंचोपपद्यते॥नंदतेचकुलंपुं ५७
सांमहात्म्यंममश्रुतं॥९५॥शांतिकर्माणिसर्वत्रत

याडुःस्वप्नदर्शने॥ग्रहपीडासुचोग्रासुमहात्म्यंशृणुयान्म
म॥९६॥उपसर्गःसमंयांतिग्रहपीडाश्चदारुणाः॥डुःस्व
प्नंचनमिर्दृष्टंसुस्वप्नमुपजायते॥९७॥बालग्रहाभिभूतानां
बालानांशांतिकारकं॥संघातभेदेचरणेमैत्रीकरणमुत्त
मं॥९८॥डुर्वृत्तानांमनोबाणंबलहानिकरंपरं॥रक्षोभूत
पीडाचनोपशमनादेवनाशनं॥९९॥सर्वंममैतन्महात्म्यंमम
सन्निधिकारकं॥पशुपुष्पार्घधूपैश्चगंधदीपैस्तथोत्तमैः
२॥विप्राणांभोजनैर्होमैःप्रोक्षणीयैरहर्निशं॥अन्यैश्चवि

विधैर्भोगैः प्रदानैर्वत्सरेणया।२०।। प्रीतिर्मेक्रियतेसाभिन्नूछ
कृच्चरितेश्रुते।श्रुतंहरतिपापानितथारोग्यंप्रयच्छति।२१
रक्षांकरोतिभूतेभ्योजन्मनांकीर्त्तनंमम।युद्धेषुचरितंय
न्मेदुष्टदैत्यनिबर्हणं।२२।।तस्मिन्श्रुतेवैरिकृतंभयंपुंसां
नजायते।युष्माभिस्तुतयोयाश्चयाश्चब्रह्मर्षिभिःकृताः
२४।ब्रह्मणाचकृतायास्तुप्रयच्छंतिशुभांमतिं।।अरण्येप्रां
तरेवापिदावाग्निपरिवारितः।२५।।दस्युभिर्वावृतःशून्येगृ ५८
हीतोवापिशत्रुभिः।। सिंहव्याघ्रानुयातोवावनेवावनहस्ति

भिः।२६।।राज्ञाक्रुद्धेनचाज्ञप्तोवध्योबंधगतोपिवा।।आघु
र्णितोवावातेननस्थितःपोतेमहार्णवे।२७।।पतत्सुचापिशस्त्रे
षुसंग्रामेभृशदारुणे।।सर्वाबाधासुघोरासुवेदनाभ्यर्दितो
पिवा।२८।।स्मरन्ममैतच्चरितंनरोमुच्येतसंकरात्।।मम
प्रभावात्सिंहाद्यादस्यवोवैरिणस्तथासूरादेवपलायंतेस
रतश्चरितंमम।२९।।ऋषिरुवाच।३०।।इत्युक्त्वासाभगवती
चंडिकाचंडविक्रमा।३१।।पश्यतामेवदेवानांतत्रैवांतरधी
यत।।तेपिदेवानिरातंकाःस्वाधिकारान्यथापुरा।३२।।य

तभागभुजःसर्वेचक्रुर्विनिहतारयः। दैत्याश्चदेव्यानिहतेषु
भैदेवरिपौयुधिशुंभनिशुंभहिंसिनिनस्मिन्महोग्रेतुल्यविक्रमे
निशुंभेचमहावीर्येशेषाःपातालमाययुः॥३५॥ एवंभगव
तीदेवीसानित्यापिपुनःपुनः॥ संहृत्यःकुरुतेभूपजगतः
परिपालनं॥३६॥ तयैतन्मोह्यतेविश्वंसैवविश्वंप्रसूयते
साचिताचविज्ञानंतुष्टाऋद्धिंप्रयच्छति॥३७॥ व्याप्तंत
यैतत्सकलंब्रह्मांडमनुजेश्वर। महाकाल्यामहाकालि॰ ५९
महामारीस्वरूपया॥३८॥सैवकालेमहामारीसैवसृष्टिर्भ

वत्यजा॥स्थितिंकरोतिभूतानांसैवकालेसनातनी॥३९॥भ
वकालेनृणांसैवलक्ष्मीर्वृद्धिप्रदायहे॥सैवाभावेतथालक्ष्
स्मीर्विनाशायोपजायते॥४०॥स्तुतासंपूजितापुष्पैर्धूपगं
धादिभिस्तथा॥ददातिवित्तंपुत्रांश्चमतिधर्मेतथाशुभां॥४१
इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येदेव्या
माहात्म्यं॥द्वादशोऽध्यायः॥१२॥ ॥श्र॥ ॥ह॥
रुषिरुवाच॥ ॥१॥एतन्नेकथितंभूपदेवीमाहात्म्यमुत्तमं
एवंप्रभावासादेवीययेदंधार्यतेजगत्॥२॥विद्यातथैवक्रि

यनेभगवन्विष्णुमायया॥तयात्वमेववैश्यस्वतथैवान्येविवे
किनः॥३॥मोहंतेमोहिताश्चान्येमोहमेष्यंतिचापरे॥ता
मुपैहिमहाराजशरणंपरमेश्वरीं॥४॥आराधितानैव
नृणांभोगस्वर्गापवर्गदा॥५॥मार्कंडेयउवाच॥ईदृशं
तस्यवचःश्रुत्वासुरथःसुनराधिपः॥६॥प्रणिपत्यम
हाभागंतमृषिंसंशितव्रतं॥निर्विण्णोतिममत्वेनराज्यापह
रणेनच॥७॥जगामसद्यस्तपसेसचवैश्योमहामुने॥
संदर्शनार्थंमंबायानदीपुलिनसंस्थितः॥८॥सचवैश्य॰ ६

स्तपस्तेपेदेवीसूक्तंपरंजपन्॥तौतस्मिन्पुलिनेदेव्याः कृ
त्वामूर्त्तिंमहीमयीम्॥९॥अर्हणंचक्रतुस्तस्याःपुष्पधू
पाग्नितर्पणैः॥निराहारौयतात्मानौतन्मनस्कौसमाहितौ
॥१०॥दृढंतुस्तोबलिंचैवनिजगात्रास्रगुक्षितौ॥एवंसमारा
धयतोस्त्रिभिर्वर्षैर्यतात्मनोः॥११॥परितुष्टाजगद्धात्रीप्र
त्यक्षंप्राहचंडिका॥१२॥श्रीदेव्युवाच॥१३॥यत्प्रार्थ्यते
त्वयाभूपत्वयाचकुलनंदन॥१४॥मत्तस्तत्प्राप्यतांस
र्वंपरितुष्टाददामितत्॥१५॥मार्कंडेयउवाच॥ ॥ १६॥

ननोवन्नेनपोराज्यमविभ्रंश्यन्यजन्मनि॥२९॥अत्रैवचनि
जंराज्यंहतशत्रुबलंबलात्॥सोपिवैश्यस्ततोज्ञानंवव्रेनि
र्विण्णमानसः॥२९॥ममेत्यहमितिप्राज्ञःसंगविच्युतिकार
कं॥२९॥देव्युवाच॥॥२२॥स्वल्पैरहोभिर्नृपतेस्वराज्यंप्राप्स्य
तेभवान्॥२२॥हत्वारिपुनस्वलितंनवतत्रभविष्यति॥स्म
तश्चभूयःसंप्राप्यजन्मदेवाद्विवस्वतः॥२३॥सावर्णिकोम
नुर्नामभवान्भुविभविष्यति॥वैश्यवैर्यत्वयायश्चवरस्म ६२
न्तोमिवांछितं॥२४॥तंप्रयच्छामिसंसिद्धैनवज्ञानंभविष्य



तिं॥२५॥मार्कंडेयउवाच॥२६॥इतिदत्वातयोर्देवीयथा
भिलषितंवरं॥२७॥बभूवांतर्हितासद्योभक्त्याताभ्यामभि
ष्टुता॥एवंदेव्यावरंलब्ध्वासुरथःक्षत्रियर्षभः॥२८॥सू
र्यजन्मसमासाद्यसावर्णिर्भवितामनुः॥२९॥इतिमार्क
ंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येसुरथक्षत्रियो
वरप्रदानंनाम॥त्रयोदशोऽध्यायः॥२३॥ ॥छ॥ ॥छ
शुभंभवतु॥ ॥कल्याणमस्तु॥ ॥छ॥ ॥छ

ROYAL ASIATIC SOCIETY OF THE BOMBAY BRANCH OF THE ASIATIC SOCIETY
Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017